गदाधरराजगुरुकृतः

शुद्धिसारः

द्वितीयभागः

सम्पादकः

डा. जयकृष्णमिश्रः

धर्मशास्त्रविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,

श्रीविहारः, पुरी - ७५२००३

गदाधरराजगुरुकृतः

शुद्धिसारः

द्वितीयभागः

सम्पादकः

डा. जयकृष्णमिश्रः

उपाचार्यः

स्नातकोत्तरधर्मशास्त्रविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,

श्रीविहारः, पुरी - ७५२००३

शुद्धिसारः (द्वितीयभागः)

Published with the partial financial assistance given by U.G.C. under the authority of Sri Jagannath Sanskrit Vishvavidyalaya, Srivihar, Puri.

सम्पादकः

डा. जयकृष्णमिश्रः

संग्रामकल्कवलेन्, वडशङ्खः, पुरी - 752002

दूरभाषः - 24346

© स्वत्वं सम्पादकाधीनम्

प्रथमसंस्करणम्

स्नानपूर्णिमा - २००१

प्रतिलिपयः - १०००

मूल्यम् - Rs. 50/- (Fifty rupees)

Published by
Sri Damodar Puspalak
Sadgrantha Niketan, Srimandir, Puri.

Printed by - GRAPHIC POINT, Marichikote Lane, Puri - 752001

पूर्वाभासः

उत्कलीयधर्मशास्त्रसंप्रदाये यावन्तो निबन्धकाराः सन्ति ते तिसृभिः श्रेणिभिः विभज्यन्ते । यथा आद्यश्रेणिकाः, मध्यश्रेणिकाः, अन्त्यश्रेणिकाश्चेति । अन्त्यश्रेणिका आधुनिकनिबन्धकारा उच्यन्ते । एतेषु ये आद्यश्रेणिकाः ते धर्मशास्त्राणि व्याख्याय मीमांसादिसहायकशास्त्रैः धर्मशास्त्रार्थनिर्णयं कुर्वन्ति, ये च मध्यश्रेणिकास्ते पुराणादिशास्त्राणां समप्रामाणिकतामवधार्य धर्मशास्त्रार्थनिर्णये प्रायेण पौराणिकस्मार्तपरंपरामुद्घाटयन्ति । ये आधुनिकास्ते देशाचारस्य शास्त्रमूलकतां शास्त्रविषयस्य देशाचारानुगृहीततां च उपजीव्य धर्मशास्त्रविचारं पुष्कलयन्ति यत्र मीमांसा-पुराणेतिहासादिशास्त्राणि अङ्गभूतानि भवन्ति । गदाधरराजगुरुः आधुनिकोत्कलीयधर्मशास्त्रसंप्रदाये मूर्धन्यभूतो वर्तते योऽष्टादशसारविशिष्टां गदाधरपद्धतिं विरचय्य उत्कलीयस्मार्तपरंपराया निरन्तरत्व-मुज्जृम्भयति ।

अष्टादशसु सारेषु आचारसारः, कालसारश्च प्राङ्मुद्रितौ । शुद्धिसारस्य प्राथमिको मुद्राप्रकाशोऽस्माकं सुहृद्वरैः आचार्यजयकृष्टमिश्रवर्यैः संप्रति क्रियते । आचारसारे गदाधरः नित्यकृत्यरूपेण यो व्यक्तिधर्मस्तं विचारयति । कालसारे कालस्य व्यावहारिकतां प्रकटय्य गदाधरो यं विचारमुपन्यस्यति तत्र उत्कलीयपरंपरायां कालस्य मान्यता प्रदर्श्यते । किन्तु शुद्धिसारग्रन्थे गदाधरः त्रिविधां शुद्धिं विचारयति । यथा कालशुद्धिः, द्रव्यशुद्धिः, शरीरशुद्धिश्चेति । शुद्धिसारग्रन्थे विद्यमानामशौचविषयिणीं कारिकामुद्धृत्य गदाधरस्तां कालसारग्रन्थेऽन्तर्भावयति । एतेन कालसंपृक्ताशौचविषयः शुद्धिसार-कालसारयोर्मध्ये संबन्धं पुष्णाति ।

अत्रेदमेव विभाव्यं यत् गदाधरः ख्रीष्टीयाष्टादशशतकस्य उत्तरार्धे समजनि । तस्मिन् समये तत्पूर्वकाले च यवनशासकानां राजत्वमुत्कलेषु आसीत्, इतिकृत्वा

तस्य प्रभावः गदाधरकालीनोत्कलीयलोकाचारे भृशं पतितः। गदाधर इमं विषयं समाकलय्य परंपरादृष्टया उत्कलीयलोकाचारान् स्मृतिनिबन्धेषु समर्यादं निबद्धुं प्रयतते येन उत्कलीयाचाराणां शास्त्रमूलकताऽवश्यं प्रमाणीभवेत्।

गदाधरो मुखमुन्मोच्य भणति यत् उत्कलीयलोकाचारे मध्याह्नसन्ध्याचरणव्यवस्था नास्ति। वस्तुतः त्रिविधासु प्रातःसन्ध्या, माध्यन्दिनसन्ध्या, सायंसन्ध्या च पर्यायेणानुष्ठीयते। एतासु प्रातःसन्ध्या सायंतनसन्ध्या च पुरातन्यौ। स्मार्तपरंपरायां माध्यन्दिनसन्ध्या परवर्तिनि समये क्रोडीकृता। भारतवर्षस्य इतरेषु स्मार्तनिबन्धेषु सा सन्ध्याऽङ्गीकृता, किन्तु उत्कलीयपरंपरायां नाङ्गीकृता। अद्यावधि माध्यन्दिनसन्ध्यायाः लोकपरिचितिः उत्कलेषु दुर्लभा। एतेनेदमेव अनुमीयते यत् गदाधरसमये सन्ध्याविषयमुररीकृत्य काचित् विचिकित्सा समजनि यामपाकर्तुं स निबन्धेऽमुं विषयमुपनिबध्नाति।

उत्कलीयलोकव्यवहारे वर्णाश्रमव्यवस्थायां संस्कारस्य कश्चन गुरुः प्रभावो लक्ष्यते। ब्राह्मणाः यथा संस्कारान् अनुष्ठापयन्ति इतरेऽपि अनुष्ठापयन्ति, किन्तु इतरे ब्राह्मणानामुपरि कृतनिर्भराः। न केवलमेवमपि तु अनुकुर्वन्तो लक्ष्यन्ते। नानावेदानां नानाशाखीयानां ब्राह्मणानां निवासभूमित्वेन उत्कलभूमिर्यदि वा प्रसिद्धा तथापि शुक्लयजुर्वेदस्य काण्वशाखाध्यायिनोऽत्र प्राचुर्येण निवसन्ति। इति कृत्वा शुक्लयजुर्वेदोचितः संस्कारोऽत्र अनुष्ठीयते। ब्राह्मणेतराः सर्वे शुक्लयजुर्वेदपरंपरामनुरुध्य सर्वान् संस्कारान् अनुष्ठापयन्ति। गदाधर इममाचारं प्रमाणीकर्तुं गत्वा अस्य शास्त्रमूलकतां च निर्देष्टुं कथयति यत् 'शूद्राः वाजसनेयिनः' इति अभियोगोक्तिरत्र सार्थकीभवति इति।

उत्कलीयजनजीवने श्रीपुरुषोत्तमजगन्नाथस्य सुमहान् प्रभावो विद्यते। श्रीजगन्नाथस्य सकला सेवा पूजा च पाञ्चरात्रागमानुरोधेन भवति। किन्तु अस्याः परंपरायाः कश्चन विशेषोऽत्र परिलक्ष्यते यत् श्रीजगन्नाथस्य अर्चनकर्मणि

सूर्योदयविद्धा तिथिः स्वीक्रियते। गदाधरो निबन्धेषु अमुं विषयं स्पष्टीकुर्वन् सूचयति यत् नेयं परंपरा जगन्नाथमन्दिरसेवापूजामारभ्य प्रवर्तिता, अपि तु भुवनेश्वरे प्रतिष्ठापिते लिङ्गराजमन्दिरे च इतः पूर्वं प्रवर्तिताऽऽसीत्। तां परंपरामनुरुध्य जगन्नाथमन्दिरे सूर्योदयविद्धा तिथिः स्वीकृता। अत्र अनुसन्धातृणामेका जिज्ञासा जायते यत् ख्रीष्टीये एकादशे शतके लिङ्गराजमन्दिरे लिङ्गराजस्य पूजा प्रवर्त्तिता, ख्रीष्टीये द्वादशे शतके जगन्नाथमन्दिरे श्रीजगन्नाथस्य पूजा प्रारब्धा, ख्रीष्टीये त्रयोदशे शतके कोणार्कमन्दिरे सूर्यपूजा (सौरोपासना) प्रवर्त्तिता। गदाधरपर्यन्ताः सर्वे उत्कलीयनिबन्धकाराः लिङ्गराज-जगन्नाथयोः पूजापरंपरायां विद्यमानं शुद्धिविषयं सूचयन्ति, न कोऽपि कोणार्कसूर्यमन्दिरस्थसौरोपासनाविषये विद्यमानं शुद्धिविषयं कथयति। स्वयं गदाधरोऽपि सर्वान् अतिक्रम्य यदि वा अधिकतया उत्कलीयाचारान् संकलयति तथापि कोणार्कविषये स नीरवतां धत्ते। अस्य कारणमनुसन्धेयम्।

उत्कलेषु या वैदिकी कल्पपरंपरा विद्यते तत्र मूलाधारत्वेन निर्दिष्टा विभागाः सन्ति। अत्र शुक्लयजुर्वेदस्य वाजसनेयी संहिता, ब्राह्मणग्रन्थत्वेन शतपथब्राह्मणम्, उपनिषत्त्वेन बृहदारण्यकोपनिषत्, स्मृतित्वेन याज्ञवल्क्यस्मृतिः, श्रौतसूत्रत्वेन कात्यायनश्रौतसूत्रं, गृह्यसूत्रत्वेन पारस्करगृह्यसूत्रं, धर्मसूत्रत्वेन शङ्खलिखितधर्मसूत्रं, शुल्बसूत्रत्वेन कात्यायनशुल्बसूत्रं च उत्कलीयपरंपरां पुष्णन्ति। गदाधरः आचार्यपरंपरां द्योतयितुं कथयति यत् समग्रभारतवर्षे जना मातृपितृमरणजन्यमशौचं यथा पालयन्ति तथा आचार्यमरणजन्यमशौचं च पालयन्ति। किन्तु उत्कलेषु आचार्यमरणजन्याशौचपालनपरंपरा नास्ति। गदाधरो यदि वा अस्याः हेतुं न निर्दिशति, तथापि एतेन इदमेव अनुमीयते यत् बहुपुरातनकालादारभ्य उत्कलेषु पिता एव आचार्यो भवति स्म। इति हेतोः पृथक्परिवारसंघटनाभावात् पितृ-पुत्रपरिवारस्य एकत्वात् पितृमरणजन्याशौचमात्रमुत्कलेषु विद्यते न तु आचार्यमरणजन्याशौचम्।

भारतभूखण्डे उत्कलप्रान्तः प्राच्यभूभागेऽन्तर्भवति । अत्र गौड-प्राग्ज्योतिषपुर-मिथिलोत्कलस्मार्तपरंपरा साकल्येन विद्यते । यदा अन्यप्रान्तीयस्मार्तपरंपरया सह प्राच्यानां मतपार्थक्यं भवति, तदा गौडाद्युत्कलीयाः सर्वे एकत्र प्राच्यपरंपराया बलीयस्त्वं ख्यापयन्ति । यदा च तथा नास्ति तदा प्राच्यभागेऽपि पारस्परिकं पृथङ् मतं सूचयन्ति । गदाधर एवं परंपरां प्रदर्शयितुं स्थाने स्थाने गौडानां मैथिलानां दाक्षिणात्यानां च मतं विश्लेषयति । यदा कश्चन उत्कलीयस्मार्तपरंपरामनुरुध्य गवेषयेत् सोऽवश्यं गदाधरमुपजीवेत्, अन्यथा उत्कलीयपरंपरायाः शास्त्रमूलकतां नैव ज्ञातुं शक्नुयात् । शुद्धिसारस्य प्रकाशनेन अनुसन्धातॄणां महान् उपकारो भवेत् ।

आचार्यजयकृष्णमिश्रमहोदयाः शुद्धिसारस्य भागद्वयं विधाय कालशुद्धिं द्रव्यशुद्धिं च एकस्मिन् भागे संस्थापितवन्तः । द्वितीयभागे अपरां शुद्धिं विश्लेष्य अस्माकं बहूपकारं संपादितवन्तः । इतः पूर्वं ताडपत्रेषु शुद्धिसार आसीत्, ततः मुद्रिताक्षरं प्रति आनीय आचार्यमिश्रमहोदयाः सारस्वतभाण्डागारस्य श्रीवृद्धिं साधितवन्तः । धर्मशास्त्रे कृतभूरिपरिश्रमा इमे एतदर्थं सर्वेषां श्रद्धाभाजनं भवेयुः । विद्वांसस्तेषां श्रमस्य वैदुष्यस्य च उदर्कं सुखेन भुञ्जीरन्निति आशास्य विरम्यते ।

ज्येष्ठशुक्लैकादशी
०२.०६.२००१

ब्रजकिशोरस्वाईं

मुखबन्धः

उत्कलीयधर्मनिबन्धसंप्रदाये शुद्धिसारग्रन्थः एकं महत्त्वपूर्णं स्थानं बिभर्त्ति। स च ग्रन्थः प्रख्यातोत्कलीयधर्मनिबन्धकारेण गदाधरराजगुरुमहोदयेन विरचितः। शुद्धिसारः गदाधरविरचित-अष्टादशसारोपेतस्य गदाधरपद्धतिनामकस्य बृहद्धर्मनिबन्धस्य अंशविशेषः। अस्मिन् ग्रन्थे काण्डत्रयं विराजते। तत्र च प्रथमकाण्डे कालशुद्धिः, द्वितीयकाण्डे द्रव्यशुद्धिः, कर्त्तुर्बाह्याशौचशुद्धिश्च तृतीयकाण्डे विचारितः। शुद्धिसारस्य प्रथमभागेऽस्माभिः काण्डद्वयं प्रकाशितमस्ति। अस्मिंश्च द्वितीयभागे केवलं तृतीयकाण्डः स्थानं प्राप्नोति।

शारीरमाशौचमधिकृत्य उत्कलीयधर्मनिबन्धसंप्रदाये वर्त्तमानेषु ग्रन्थेषु शुद्धिसारः सर्वाधिकां मान्यतां प्राप्नोति। एतदर्थमेव उत्कललिप्या मुद्रिते कालसाराख्ये धर्मनिबन्धे अयं तृतीयकाण्डः 'अशौचकारिका' नाम्ना सन्निविष्टोऽस्ति। शारीरमाशौचं निर्दिष्टकालावधये लगति। तच्चाशौचं कालापेक्षत्वात् कालसारे तस्य सन्निवेशः ग्रन्थकारेण कृत इति अनुमीयते।

गदाधरः शुद्धिसारग्रन्थे स्वरचितश्लोकैः विषयानुपस्थापयति। तत्र च प्रथमकाण्डे द्वाविंशतिः (२२) श्लोकाः, द्वितीयकाण्डे चतुर्विंशत्युत्तरद्विशत (२२४) श्लोकाः, तृतीयकाण्डे च अष्टपञ्चाशत् (५८) श्लोकाः विराजन्ते। सर्वत्र मूलश्लोकमुपस्थाप्य तदनु तेषामभिप्रायः बहुप्रमाणवचनैः युक्तिजालैश्च ग्रन्थकारेण स्पष्टीकृतोऽस्ति।

ग्रन्थकारः विषयसञ्जीकरणार्थं तत्संपर्कितानां बहूनां ग्रन्थानां प्रमाणवचनानि उद्धरति। अस्मिन् ग्रन्थे ग्रन्थकृता षण्णां वैदिकग्रन्थानां, षष्टिसंख्यकानां धर्मशास्त्रकाराणाम्, अष्टाविंशतिपुराणानाम्, अष्टानां तन्त्रग्रन्थानाम्, अन्येषां च दशप्रकीर्णग्रन्थानामुद्धरणानि प्रतिपादितानि सन्ति।

शुद्धिसारग्रन्थे त्रिंशत् (३०) संख्यकानां धर्मनिबन्धकाराणां मतानि अपि स्वीकृतानि। तेषां सर्वेषां ग्रन्थानां नामानि ग्रन्थान्ते निवेशितानि सन्ति।

शुद्धिसारग्रन्थस्यास्य संपादनार्थं मया अनेकेषां महानुभवानाममूल्याभिमतं गृहीतमस्ति। ते च महानुभवाः भवन्ति श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरपरिषदः अध्यक्षाः प्रो.डँ.हरेकृष्णशतपथिमहोदयाः, धर्मशास्त्रविभागस्याचार्याः प्रो.डँ.किशोरचन्द्रमहापात्रमहोदयाः व्याकरणविभागस्याचार्याः प्रो.डँ.किशोरचन्द्रपाढीमहोदयाः धर्मशास्त्रविभागस्य वरिष्ठोपाचार्याः डँ. व्रजकिशोरस्वाइँमहोदयाः। एतदर्थं तेभ्यः हार्दिकं कृतज्ञताज्ञापनं क्रियते।

ग्रन्थोऽयं विश्वविद्यालयीयानुदानायोगानुकूल्येन आंशिकमार्थिकानुदानेन च प्रकाशितोऽस्ति। एतच्चानुदानं श्रीजगन्नाथसंस्कृतविश्वविद्यालयमाध्यमेनैव मया प्राप्तम्। तदर्थमहं विश्वविद्यालयस्य कुलपतिमहोदयेभ्यः, कुलसचिव-उन्नयनाधिकारी-वित्ताधिकारिभ्यश्च कार्त्तज्ञवाक्यं व्याहरामि।

अन्ते च जगदीशितुः जगन्नाथस्य कृपादृष्टिं प्रार्थयमानोऽहं विरमामि विस्तरात् इति शम्।

देवस्नानपूर्णिमा
६.६.२००१

विदुपामाश्रवः
जयकृष्णमिश्रः

विषयानुक्रमणिका

	विषयः	पृष्ठासंख्या
१.	अशौचभेदाः	१
२.	सपिण्डाशौचम्	२
३.	समानोदकाशौचम्	३
४.	सपिण्डसमानोदकयोः स्वरूपम्	३
५.	साग्निकनिरग्निकयोः अशौचदिवसपरिगणनविधिः	३
६.	आशौचे कर्मनिषेधविचारः	५
७.	सपिण्डीकरणश्राद्धकालविचारः	७
८.	आशौचे नित्यकर्मानुष्ठानविधिः	९
९.	आशौचे व्रतपालनविधिः	१०
१०.	आशौचिपुरुषप्रदत्तद्रव्यग्रहणविचारः	१४
११.	पुत्रजनने पितुरशौचविचारः	१८
१२.	आशौचे श्रौतस्मार्त्ताग्निपरिचरणविचारः	२०
१३.	आशौचमध्ये दर्शपाते साग्नेः सपिण्डीकरणविचारः	२१
१४.	अङ्गाशौचविचारः	२३
१५.	पित्रोर्मृत्यामन्येषामाब्दिकादिश्राद्धविचारः	२५
१६.	विमात्रादिमरणे पित्रोराब्दिकानुष्ठानविचारः	२७
१७.	बाह्याशौचशुद्धिः	३०
१८.	रजस्वलाशुद्धिविचारः	३२
१९.	गर्भस्राव-पात-अपप्रसवेषु अशौचविचारः	३४

विषयः		पृष्ठासंख्या
२०.	यमलजनने अशौचविचारः	३६
२१.	पुत्रजननादेकादशाहात्परमुपनयनमध्ये मरणेऽशौचविचारः	३७
२२.	कन्याशौचविचारः	३८
२३.	बालमरणे दाहकालविचारः	४२
२४.	सन्निपाताशौचविचारः	४२
२५.	विदेशमरणाशौचम्	४५
२६.	पितुरशौचे मातुः मरणे अशौचविचारः	४५
२७.	मातुरशौचे पितुः मरणे अशौचविचारः	४५
२८.	अनुगमनाशौचविधिः	४९
२९.	पर्ण्णदाहे साग्निनिरग्न्योः अशौचविचारः	५०
३०.	सन्न्यासिमरणे अशौचविचारः	५२
३१.	सद्यश्शौचविचारः	५३
३२.	आत्मघातिनां कृते अशौचविचारः	५५
३३.	मातामह-श्वशुर-मातुल-वानप्रस्थादीनामशौचविचारः	५७
३४.	शवस्य दहन-वहन-रोदन-अनुगमनादिषु अशौचविचारः	५८
३५.	प्रवासादप्रत्यावर्त्तने प्रत्यावर्त्तने च आशौचविचारः	६२
३६.	ग्रहणाशौचम्	६४

तृतीयकाण्डः

अथ जन्ममरणाद्यशौचविचारः

तत्र कर्तृशुद्धौ उद्देश्यप्राप्तबाह्याशौचशुद्धिर्विचार्य्यते । तथा च कर्त्रशौचस्य द्वैविध्यम् । बाह्याशौचमाभ्यन्तरमाशौचं चेति ।

बाह्यं चाभ्यन्तरं च द्विविधमिति मतं कर्त्रशौचं तु बाह्यं
देहे स्यात्तद्धनेऽपीत्युभयविधमिदं ज्ञातिजन्मादिजन्यं ।
कालस्नानापनोद्यं यदवधिविदितौ जन्ममृत्यू तदाद्यं
शेषाहैः सर्ववर्ण्णेष्वपि लगति सतां यत्र कुत्राप्यशौचम् ॥ १ ॥

कर्त्र्शौचं द्विविधं, बाह्याभ्यन्तरभेदात् । तथा च देवलः -

आशौचं द्विविधं प्रोक्तं बाह्यं चाभ्यन्तरं तथा ॥ इति ॥

आभ्यन्तरं कर्त्र्शौचं प्रायश्चित्तापनोद्यमघलक्षणं ग्रन्थगौरवभयात्तन्नात्र विचार्यते । बाह्यमपि द्विविधं, शरीरस्य कर्मानर्हत्वरूपमेकम्, अशौचिस्वत्वाश्रयद्रव्यस्यापि । इदं च बाह्याशौचं जन्ममंरणादिना जायते स्त्रीणां ऋतुप्रसवादिना च । तच्च वक्ष्यमाणकालविशेषेण स्नानेन चापगच्छति । तत्र सामान्यतो याज्ञवल्क्यः -

कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलं ।
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ (३-३१)

''वर्ष्मणो जलमिति च'' कालो दशाहादिरिति विज्ञानेश्वरः । देवलः -

जनने मरणे नित्यमशौचमनुधावति ।
सपिण्डान् पितृबन्धूंश्च यत्र क्वचन तिष्ठतः ॥

पितृबन्धवः समानोदकाः । यत्र क्वचनेति एकगृहे अन्यत्रापि वेत्यर्थः । जननं मरणं च ज्ञातमेवाशौचनिमित्तम् । तस्माद्विदेशादिवशाद् विलम्वेन श्रवणे तु अवशिष्टदिनैरेव शुद्धिर्भवति ।

तथा चादित्यपुराणे -

अपि दातृग्रहीत्रोश्च सूतके मृतकेऽपि वा ।
अविज्ञानेन दोषः स्याच्छ्राद्धादिपु कथंचन ॥

कौर्मे - देशान्तरगतं श्रुत्वा सूतकं शावमेव च ।
तावदप्रयतो मर्त्यो यावच्छेषः समाप्यते ॥ (३.२३.२०)

बृहस्पतिरपि -

अन्यदेशमृतं जातं श्रुत्वा पुत्रस्य जन्म च ।
अनिर्गते दशाहे तु शेषाहोभिर्विशुध्यति ॥ इति ॥
सापिण्ड्ये तद्दशाहं त्रिदिनमपि समानोदकत्वेऽपि यावत्
ज्ञानं स्याज्जन्मनाम्नोरपि भवति समानोदकत्वं हि तावत् ।
तुर्याद्या लेपभाजो जनकप्रभृतयः पिण्डभाजोऽथ पिण्ड -
स्रष्टा स्यात् सप्तमश्चेत्यपि भवति सपिण्डत्वमासप्तमं तत् ॥ २ ॥
जीवः सप्तद्वयान्तन्निगदति पुरुषान् व्याप्य चैकोदकत्व -
मज्ञाने जन्मनाम्नोरपि भवति तदभ्यन्तरे तन्निवृत्तिः ।
एवं सत्येव यस्मान्मनुवचनसुराचार्यवाचौ विरुद्धे
स्यातां न तत्सुधीशा विदधत सुविचार्य्यैव जीवस्य पक्षम् ॥ ३ ॥

बृहस्पतिः -दशाहेन सपिण्डास्तु शुद्ध्यन्ति मृतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ॥

सपिण्डाश्च मात्स्ये - (१८/२८-२९)

लेपभाजः चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुपम् ॥

मनुः - सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावश्च जन्मनाम्नोरवेदने ॥ (५-६०)

एतद् व्याख्याने मेघातिथिः ''स्वप्रपितामहस्य यः प्रपितामहः तदन्वये यावन्तः सप्तमास्ते त्वस्य सपिण्डाः'' ॥ इति

समानोदकभावश्च निवर्त्तेताचतुर्द्दशात् ।

इति । बृहस्पतिवचनात्तु

'मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते'

इति स्ववचनविरोधादेव नादरणीयमिति केचित् । वस्तुतस्तु चतुर्द्दशपुरुषादूर्ध्वं जन्मनामज्ञानेऽपि समानोदकभावः । चतुर्द्दशपुरुषमध्ये जन्मनाम्नोरज्ञाने मनुवचनस्य सावकाशत्वाद् बृहस्पतिवचनस्य निरवकाशत्वेन बलवत्त्वम् ।

तत्रास्मत्पद्ये सपिण्डसमानोदकयोः पौर्वापर्यविपर्यासो निबन्धसौकर्यार्थः इति उभयोः कारिकयोः ॥ २-३ ॥

एकाग्नेरप्यनग्नेरपि मरणदिनावध्यशौचं तु साग्ने -
र्दाहोर्ध्वं दैवतश्चेद्दहनमपि कृतं लौकिकेनाग्निनास्य ।
नास्त्येवाशौचमेतत्तनयकुलभुवां किन्तु दाहो यदास्याः
च्छ्रौतेनास्याग्निना स्यात्तदवधि गदितं पर्ण्णदाहेऽस्य तद्वत् ॥ ४ ॥

श्रौताग्निमतो दाहात्पूर्वं ज्ञातीनां पुत्रस्य च अशौचाभावः ।

अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्मणः ।
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथातिथि ॥

इत्यङ्गिरःस्मृतेः ।

जातुकर्ण्णः - एकाग्नेर्मरणादूर्द्ध्वमशौचं श्राद्धमेव च ।
यस्य तु त्रयमग्नीनां तस्योद्ध्वं दाहकर्मणः ॥
ऊद्ध्वं त्रिपक्षाद् यच्छ्राद्धं मृताहन्येव तद्भवेत् ।
अधस्तात्कारयेद्दाहादाहिताग्नेर्द्धिजन्मनः ॥

अतएव विज्ञानेश्वराः ''आहिताग्नौ पितरि देशान्तरमृते पुत्रादीनामर्वाक् संस्कारात् सन्ध्योपासनादीनां कर्मणां लोपो नास्ति'' इति लिखितवन्तः ।

तथा चाहिताग्नेर्दैवाल्लौकिकाग्निना दाहेऽपि पश्चाच्छ्रौताग्निना यदास्थिदाहः ततः प्रभृत्येवाशौचं, तत् पूर्वमशौचं नास्ति, एवं निर्ण्णीयते । साग्निके पितरि मृते पुत्रस्य दाहादूर्द्ध्वमशौचं, ज्ञातीनां मरणादूर्द्ध्वमिति शुद्धिगुच्छकारव्यवस्था. निरस्तैव ॥

अस्थ्यभावे पर्ण्णनरदाहस्य उक्तत्वात्तद्दाहेऽपि ततःप्रभृत्येवाशौचम् । तथा छन्दोगपरिशिष्टे -

विदेशस्थस्य मरणे अस्थिन्यभ्येज्य सर्पिषा ।
दाहयेदूर्ण्णया श्राद्धपात्रन्यासादि पूर्ववत् ॥
अस्थ्नामलाभे पर्ण्णानि शकलान्युर्ण्णया वृता ।
दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकम् ॥

आवृता परिपाट्या, सूतकम् अशौचम् ॥ ४ ॥

दम्पत्योराहिताग्न्योरपि सततवितानाग्निनैकस्य दाहे
पश्चादन्यस्य मृत्यामरणिजनिमताप्यग्निना लौकिकेन ।
दाहेऽशौचं न दाहावधि भवति परं मृत्युघस्रावधि स्यात्
श्रौताधानस्य मध्ये यदि भवति मृतिर्मृत्युर्घस्रावधि स्यात् ॥ ५ ॥

दम्पत्योः पूर्वमृतस्य श्रौताग्निना दाहे पश्चान्मृतस्य वक्ष्यमाणोक्त्या लौकिकारणिजन्येनाप्यग्निना दाहे मरणदिनावध्येवाशौचम् । पश्चान्मृतस्येति वचने लौकिकाग्निनेत्युक्तेराहिताग्नित्वाभावात् । तथा चादित्यपुराणे -

अहिताग्न्योस्तु दम्पत्योर्यस्त्वादौ म्रियते भुवि ।
तस्य देहः सपिण्डैस्तु दग्धव्यः त्रिभिरग्निभिः ॥
पश्चान्मृतस्य देहस्तु दग्धव्यो लौकिकाग्निना ।
अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः ॥
तदभावे पलाशोत्थैः पत्रैः कार्यः पुमानपि ।
शतैः त्रिभिः तथा षष्ठ्या शरपत्रैर्विधानतः ॥

वेष्टितव्यः तथा पश्चात् कृष्णसारस्य चर्मणा ।
ऊर्णासूत्रेण संवेष्ट्य प्रलेप्तव्यस्तथा यवैः ॥
सपिण्डैर्जलसंमिश्रैर्दग्धव्यश्च वृथाग्निना ।
असौ स्वर्गाय लोकाय स्वाहेत्युक्ता स्वबान्धवैः ॥

वृथाग्निः लौकिकाग्निः एवं च सति आहिताग्नेरित्यत्र निष्ठान्ते आहिताग्निपदे साङ्गप्रधानक्रियोपरमप्रतीतेराहिताग्निधर्माः साङ्गप्रधानाभिन्नवृत्त्यन्तरमेव । तथा च संस्कृते कर्मसंस्काराणां तदर्थत्वादिति जैमिनिना पञ्चमाध्याये तृतीयपादे (२१ अधि.) क्तप्रत्ययान्तस्य क्रियोपरमप्रतीतेरेव सिद्धान्तिता । एवं च आधानमध्ये यजमानमरणे नाहिताग्नित्वविधिरिति मरणदिनावध्येवाशौचम् ॥ ५ ॥

आशौचे कर्मणां नो भवति किल निषेधान्वयो येन कृत्वा
तस्मिन् सन्ध्यादिके स्यादपि विहितनिषिद्धत्वयोगाद्विकल्पः ।
किन्तु स्यात्पर्युदासस्तदिदमभिहितं सम्भवत्यत्र यद् यत्
सन्ध्यादि स्यादुपास्यं भवति हि तदशौचाहभिन्नेष्वहस्सु ॥ ६ ॥

अथाशौचे कर्मनिषेधविचारः ।

सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते ।

इत्यादिषु अशौचे कर्मणां निषेधः, येन विहितप्रतिषेधे विकल्पः स्यात् । किन्तु पर्युदासः । यत्सन्ध्यादिकमुपास्यं, तदन्यत्राशौचदिनेभ्य इति ।तथा विष्णुपुराणे- (३-११-९९)

सर्वकालमुपस्थानं सन्ध्ययोः पार्थिवेष्यते ।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः ॥

विभ्रमो भयं विनाप्याकुलता । अत्र निबन्धकृतः 'जननमरणाशौच एव पर्युदासः । सन्ध्याया अकरणत्वप्रतिपादकबहूक्तिश्रवणात् । विभ्रमातुरभयेषु सति सम्भवे कार्यैव । असम्भवे त्वकरणे तु न दोष' इति तात्पर्यम् ॥ ६ ॥

सन्ध्या स्मार्त्ताग्निहोमः श्रुतिपठनमुखाः पञ्चयज्ञाश्च दाना -
दाने स्मार्त्तं च कर्म त्रिविधमहिमरुक्संक्रमस्नानदाने ।

दर्शश्राद्धादि पित्र्यं न भवति तु भवेज्जातकर्मादि षष्ठा -
हाद्युक्तं प्रेतकर्म दशमदिनमथ स्नानमुख्यं ग्रहे च ॥ ७ ॥

ग्रहो ग्रहणम् । अशौचे केषांचित् कर्मणां लोप एव, केषांचित्तन्मध्येऽपि करणम् । केषांचित्तदनन्तरमेव करणमिति व्यवस्था क्रियते । अत्र जावालिः -

सन्ध्या पञ्चमहायज्ञा नैत्यकं स्मृति कर्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥ इति ।

ननु सन्ध्याया अशौचेऽप्यपरित्यागः । पुलस्त्य आह -

सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ।
न त्यजेत् सूतके वापि त्यजन् गच्छत्यधोगतिम् ॥

इत्यत्र विरोधाभावः कथमिति चेत् ? उच्यते, पुलस्त्यवचनस्य मानसिकसन्ध्याकरणे तात्पर्यम् । न तु साक्षात्सन्ध्याकरणे ।

मृतके सूतके चैव सन्ध्याकर्म समाचेरत् ।
मनसोच्चारयेन्मन्त्रान् प्राणायाममृते द्विजः ॥

इति वचनान्तरात् अञ्जलिप्रक्षेपमात्रस्य वक्ष्यमाणत्वात् नैत्यकशब्देन अवश्यकर्त्तव्यनैमित्तिकानामपि संग्रहः । अनारब्धकाम्यानां तु सर्वथा निवृत्तिः । तथा च कालिदासचयनिनः "स्मार्त्तं च कर्म त्रिधा त्याज्यम्" (श्लो.४) इति । त्रिधा नित्यं नैमित्तिकं काम्यं च । रविसंक्रान्तिस्नानादिकं नैमित्तिकत्वाद् वर्ज्यम् ।

न च नैमित्तिकोच्छेदः कर्त्तव्यो हि कथंचन ।

इति वाक्यस्य प्रामाण्ये सूतकादिमध्यपतितजातकर्मसञ्चयनादि विषयत्वमिति सर्वनिबन्धकृतः । यमशंखौ - (शं.स्मृ. १५-२४)

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमशौचे विनिवर्त्तते ॥

तेन दर्शाष्टकादिश्राद्धानां पितृकर्मत्वान्निवृत्तिः । होमोऽत्र स्मार्त्तः । श्रौतस्य वाक्यान्तरेण तत्राप्यनुष्ठेयत्वात् । तथा च पारस्करः (३-१०-३१)

"नित्यानि विनिवर्त्तेरन् वैतानवर्जम्" इति। मार्कण्डेयः -

षष्ठेऽह्नि रात्रियागं तु जन्मदानां च कारयेत्।

रक्षणीया तदा षष्ठी निशा तत्र विशेषतः॥

जन्मदानां षोडशमातृणां। षष्ठी षष्ठीदेवी। निशां निशां व्याप्य अत्यन्तसंयोगे द्वितीया। प्रजापतिः -

एवं प्रेतक्रियायां तु पूर्वाशौचं न बाधकम्।

स्मृत्यन्तरे -ग्रहणे शावमाशौचं विमुक्तौ सूतकं स्मृतम्।

एवं ग्रहणमुक्तेरपि स्नाननिमित्तत्वम्। अत एव लिङ्गपुराणे -

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतकेऽपि वा।

अस्नायी मृत्युमाप्नोति स्नायी पापं न विन्दति॥

तद्विहितश्राद्धदानादिकमप्यत्र कार्यम्। तथा च तत्रैव-

सूतके मृतके चैव न दोषो राहुदर्शने।

तावत्कालं भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते॥

अत्र यच्छुद्ध्यभिधानं तद्दानश्राद्धार्थमेव। पूर्वेण स्नानस्य प्राप्तेः।

सूतके मृतके चैव न दोषो राहुदर्शने।

स्नानमात्रं च कर्त्तव्यं श्राद्धदानविवर्ज्जितम्॥

इति गौडदेशीयसम्वत्सरधृतवाक्यं, तत्र मूलं न दृश्यते। ७।

श्राद्धे त्रैपक्षिकैकादशदिनविहिते चाब्दिकं मासिकान्यू-

नाब्दोत्पन्नं सपिण्डीकृतिरपि न भवेदूनषाण्मासिकं च।

प्रेते साग्नौ त्रिपक्षाभिहितमपि भवेद्योजनं नो निरग्नेः

किन्तु श्राद्धान्यशौचव्यपगमदिवसे तान्यवश्यं भवेयुः॥ ८॥

योजनं सपिण्डीकरणम्। स्मृतिः -

मासिकाब्दे तु संप्राप्ते कदाचिन्मृतसूतके।

वदन्ति शुद्धौ तत्कार्यं दर्शे वापि मनीषिणः।

मासिकाब्दे मासिकाभिधेयकर्मणीत्यर्थः। तथा च एकादशाहश्राद्धस्य ऊनषाण्मासिकत्वात् त्रैपक्षिकश्राद्धस्य सार्द्धमासिकत्वात् ऊनषाण्मासिकोनसाम्वत्सरिकयोः षाण्मासिकसंज्ञात्वात् सपिण्डीकरणस्य द्वादशमासे विहितत्वाच्च एकादशाहत्रैपक्षिकोनषाण्मासिकोनसाम्वत्सरिक- सपिण्डीकरणानि मासिकश्राद्धवदशौचानन्तरदिवसे कार्याणीत्यर्थः। अत्र यत् 'दर्श' इति पक्षान्तरं तदशौचान्तदिने विघ्ने सतीति वोध्यम्। **'एकादशे नवश्राद्धे'** इति वक्ष्यमाणोक्तेः एकादशाहश्राद्धप्रस्तावे तस्य ऊनषाण्मासिकसंज्ञत्वं वक्तव्यम्। नन्वेवं सति -

आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि।
कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥

इति शङ्खवचनस्य का गतिरिति चेदुच्यते। अत्र केचित् विज्ञानेश्वरोल्लिखितमपि तदभिप्रायमुन्नीय द्वादशाहाद्यशौचं क्षत्रियादिपरतया समादधते। तन्न सम्यगिति प्रतीमः। तथाशौचापगम इति विष्णुना सर्वसाधारण्येन एकादशाहश्राद्धमशौचापगम एवोक्तम्। मात्स्येऽपि-

तत्र एकादशाहे तु द्विजानेकादशैव तु।
क्षत्रादिः सूतकान्ते तु भोजयेद्युतो द्विजान्॥

इति क्षत्रादीनामशौचान्त एकादशाहकृत्यमुक्तम्। अत एव कल्पतरुकारैः **'मृतेऽहनि तु कर्त्तव्य'** (१.२५६) मिति याज्ञवल्कीयवचने एकादशाहपदमशौचान्तोपलक्षणमिति व्याख्यातम्।

राज्ञां तु दशमः पिण्डो द्वादशेऽहनि दीयते।
वैश्यस्य पञ्च दशमे ज्ञेयस्तु दशमस्तथा॥
शूद्रस्य दशमः पिण्डो मासे पूर्ण्णे हि दीयते।

इत्यादिपुराणोक्तौ पूरकपिण्डदानस्य क्षत्रादीनां द्वादशदिनादिषूक्तत्वात्तत्पूर्वमुत्तरषोडशाधिकाराभावात्। अतएवात्राभियुक्ताः **'आद्यं श्राद्धमशुद्धोऽपि'**

इत्युक्तेः कल्पतरुकारादिभिरनादृतत्वेन अनुष्ठानलक्षणमप्रमाणमित्याहुः । एवं च 'पर्ण्णदाहादिप्रयुक्त त्र्यहाशौचान्तदिने एकादशाहश्राद्धसमाचारः संगच्छते, न त्वेकादशाहपर्यन्तापेक्षे' ति कामधेनुकारः । अत एव आद्यश्राद्धमिति संज्ञा । ब्राह्मणस्य सर्ववर्ण्णोत्तमत्वादधिकेन व्यपदेशो भवतीति न्यायादेकादशोक्तिरिति सिद्धम् । यदि 'आद्यं श्राद्धं' इति शङ्खोक्तेः कालादर्शकारादृतत्वेन प्रामाण्यमङ्गीकार्यं, तर्हि तद्देशीयानां वैकल्पिकं तदिति वोध्यं, न त्वस्मद्देशीयानाम् । एवं निरग्निपुत्रेण साग्निकस्य पितुस्त्रिपक्षे सपिण्डीकरणं कार्यमिति यद्वक्ष्यते, तदप्यशौचान्त एव कार्यम् । 'पितृणां श्राद्धे' त्यृष्यशृङ्गोक्तेः मासिकार्थ इत्युक्तौ संगृहीतत्वाच्च ॥ ८ ॥

अस्पृश्यस्पर्शनोक्ताप्लवनमिव सदा स्नानमत्राप्यमन्त्रं
प्राणाहुत्यः समन्त्राः परमिह तदपोशानयुग्मं समन्त्रम् ।
सावित्र्या प्राश्य नीराञ्जलिमिह च परिक्रम्य सन्ध्यानिषेधे
सूर्यं वन्देत कर्म यदथ भगवतो वन्दनादीनि न स्युः ॥ ९ ॥

स्मृतिः - **सूतके मन्त्रवत्कर्म स्मार्त्तं नैव समाचरेत् ।**
आपोशानद्वयं मुक्त्वा तथा प्राणाहुतीरपि ॥

एवं च प्रातःस्नानं मन्त्ररहितं कार्यम् । विण्मूत्रचण्डालादिस्पर्शविहितस्नानस्य शौचेऽप्यमन्त्रकत्वात् सुतरामत्राप्यमन्त्रकत्वम् ।

ननु - **अस्नाताशी मलं भुंक्ते अजपी पूयशोणितं ।**
अहुत्वा च कृमीन् भुंक्ते अदत्त्वा विषभोजनम् ॥

इति जाबालवचनात् भोजननिमित्तयोर्जपस्नानयोरशौचे कार्यत्वमिति चेन्न । नैमित्तिकानामप्यत्र निषिद्धत्वात् । अथवा एतद् वाक्यस्याशौचेतरदिनेषु सावकाशत्वेन कर्मत्यागस्मृतेर्निरवकाशत्वेन वलवत्त्वात् तद्वाक्यैकदेशोक्त स्मार्त्तदानयोरपि कार्यत्वापाताच्च । नन्वत्र नैमित्तिकस्य निषेधे चण्डालाद्यस्पृश्यस्पर्शनस्नानस्य नैमित्तिकत्वात् स्नानस्याकरणं प्रसज्येत, इति चेन्न । शक्तिविषये **'न मुहूर्त्तमप्रयतः स्यात्'** इत्यापस्तम्वोक्तेर्निषेधपरिपालनरूपेण शौचस्य

कार्यत्वं, न तु नैमित्तिकत्वात्। सन्ध्यानिषेधे पैठीनसिः 'सावित्र्यञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं नमस्कुर्यात् एतावत् कार्यमिति'। तस्मात् सर्वथा जपो न कार्यः। जपस्य किञ्चित्करणमिति केचिद् वदन्ति, तन्न चारु। वाचनिकेऽर्थे शङ्काया अनुचितत्वात्। 'किञ्चित् पूर्वां सन्ध्यां जपंस्तिष्ठेत्' इत्यादिना अञ्जलिप्रक्षेपयोः सन्ध्याप्राधान्यात्तन्निषेधस्य निरवकाशत्वं स्यात् इति संक्षेपः। वाराहे द्वात्रिंशदपराधमध्ये -

उच्छिष्टे चैव वाशौचे भगवद्वन्दनादिकम्।

इति गणनात् भगवद्वन्दनादिकं न कार्यम्। उच्छिष्टे लेपाद्यशौचे, अशौचे सूतकाद्यशौचे ॥ ९ ॥

शारीरं स्याद् व्रतोक्तं निखिलनियमनं कार्त्तिकादिव्रतेषु
प्रारब्धेष्वेव देवापचितिवितरणे किन्तु वान्यैर्विधेये।
यद्वाघान्तेषु कार्ये यजनवितरणे पञ्चगव्याशनान्ते
तद्वन्नार्य्यश्चरेयु रजसि परमुपोष्यदसीयास्तु रात्रीः। १० ॥

लिङ्गपुराणे -

प्रारब्धे तु व्रते पश्चादशौचं यदि जायते।
शरीरनियमः कार्यः पूजादानविवर्जितः ॥
अशौचान्ते ततः स्नात्वा पञ्चगव्यकृताशनः।
देवं पूर्वोक्तविधिना दक्षिणां दापयेत् सदा ॥
भवेद्रजस्वला नारी यद्येवं व्रतवासरे।
भवितव्यं तयाप्येवं शरीरक्लेशयुक्तया ॥
यस्मिन् दिने भवेच्छुद्धा विधिं तस्य समाचरेत्।
व्रतस्य राजशार्दुल ! नैव खण्डं कृतं भवेत् ॥

अङ्गिराः - प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्।
न तेन तद् व्रतं तासामुपहन्यात् कदाचन ॥

स्वभाव एष नारीणां ज्ञेयो मूत्रपुरीषवत् ।
ततोऽर्थान्न प्रदुष्यन्ति चरेयुरेव तद्व्रतम् ॥

तथा - नियमस्था यदा नारी प्रपश्येदन्तरा रजः ।
उपोष्यैव तदा रात्रीः शेषं स्नात्वा व्रतं चरेत् ॥

गरुडपुराणे तु पक्षान्तरं -

अन्यैर्दानादिकं कार्यं कायिकं स्वयमेव हि । इति ।

अत एव एकादशीप्रस्तावे माधवाचार्याः 'स्त्रीणां रजोदर्शनेऽपि न व्रतत्यागः । किन्तु देवार्च्चनादिरहितं सूतकादाविव उपवासमात्रं कार्यमित्यादि' ॥ १० ॥

देवार्चार्चान्यगोत्रैर्हरिगिरिशशिवाब्रह्मपूजा च नित्या
मानस्येकादशी श्रीमधुरिपुयजनं मानसं वाऽघपाते ।
आरब्धं पूर्वरिक्थैर्व्रतसुरयजनं स्याद्यथारब्धजाप्य-
श्रोत्राद्यं तीर्थयात्राद्यनुदिवसमिह स्यादघान्ते समाप्यम् ॥ ११ ॥

देवार्चा देवप्रतिमायाः पूजेत्यर्थः । व्रतरूपं सुरयजनं शरत्कालीनं दुर्गोत्सवादि । पूर्वरिक्थैः अशौचात्पूर्वं सञ्चितद्रव्यैः । जप एव जाप्यं तीर्थं गङ्गागयादि, यात्रा श्रीगुण्डिचादिदेवोत्सवः । अशौचे सर्वकर्मनिषेधेऽपि 'नार्चयित्वा तु यो भुंक्ते' इत्यादि विशेषवाक्यैर्विष्णुब्रह्माहरदुर्गाणां पूजायाः कार्यत्वशङ्काया नैमित्तिकत्वात् स्नानजपवन्निषिद्धत्वेऽपि -

अथ सूतकिनः पूजां वदाम्यागमचोदितां ।
स्नात्वा नित्यं च निर्वर्त्त्य मानस्या क्रियया तु वै ॥
बाह्यक्रियाक्रमेणैव ध्यानयोगेन पूजयेत् ॥

इति यमोक्तिबलान्मानसी पूजैव कार्या । पुष्पाञ्जलित्रयदानमष्टपुष्पिका पूजा वा कार्येति कैश्चिद् यल्लिखितं, तन्न चारु । शक्तिविषये तयोर्विधानादशौचे प्रसराभावात् । यत्तु राघवभट्टेन -

जपो देवार्चनविधिः कार्यो दीक्षान्वितैर्नरैः ।

नास्ति पापं यतस्तेषां सूतकं वा यतात्मनाम् ॥

इति यल्लिखितं तदशौचाभाववद् यतिब्रह्मचार्यादिविषयम् । तथा च

'असपिण्डगृहे नीत्वा पूजनीयः सदाशिवः'

इति वाक्यादसगोत्रगृहे पूजा कारयितव्या । सदाशिव इत्युपलक्षणात् विष्ण्वादिदेवानामपि । एवं सति प्रतिष्ठार्च्चा न त्याज्या । **'यावज्जीवं तदर्चनम्'** इति हयशीर्षवाक्यस्य ब्राह्मणान्तरद्वारा करणान्न विरोधः । स्कान्दे चन्द्रशर्मणो वैष्णवार्च्चाप्रतिज्ञायां -

मया भक्त्या प्रकर्त्तव्यं प्रत्यहं पूजनं तव

इति भगवत्प्रीतिरूपफलकामनया यावज्जीवकृतसंकल्पस्यैवादेयमिति केचित् । वस्तुतस्तु नित्यारब्धाया विष्णुपूजायाः सन्ध्यादि नित्यकर्मवत् अशौचेतरदिनत्रयमेवेति सर्वं समञ्जसम् । एकादश्यां मानस्येव पूजा ।

सूतकेऽपि नरः स्नात्वा प्रणम्य मनसा हरिं ।

एकादश्यां न भुञ्जीत व्रतमेतन्न लुप्यते ॥

मृतकेऽपि न भुञ्जीत एकादश्यां सदा नरः ॥

इति वाराहोक्तेः । माधवीये तु पक्षान्तरमुक्तम् । तथा एकादशीं प्रकृत्य मात्स्ये

सूतकाद्ये नरः स्नात्वा पूजयित्वा जनार्द्दनं ।

दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते ॥

सूतके मृतके चैव त्रिष्वशौचं न विद्यते ।

यज्ञे विवाहकाले च दैवयागे तथैव च ॥

इति वाक्यात् प्रारब्धशरत्कालीनदुर्गोत्सवादिव्रतेषु नाशौचम् ।

अशौचद्रव्यस्य पूजानर्हत्वेऽपि तदर्थं पूर्वसञ्चितद्रव्यैः पूजा ।

बृहस्पतिः - विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।

पूर्वसंकल्पितं द्रव्यं न दुष्यति कदाचन ॥

लैङ्गे - सूतकान्मृतकात् पूर्वं धर्मार्थं यत्प्रकल्पितं ।
द्रव्यं तेन यजेद्धीमांस्तथैवोत्पादितैरपि ॥

पैठीनसिः -विवाहयज्ञदुर्गेषु यात्रायां तीर्थकर्मणि ।
न तत्र सूतकं तद्वत्कर्मयज्ञादि कारयेत् ॥
व्रतयज्ञविवाहेषु श्राद्धे होमार्चने तथा ।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

इदं सहस्रनामस्तवादिकर्मोपलक्षणम् ।

सर्वसंकल्पितार्थे च तस्मिन्नशौचमुच्यते ।

इति यमोक्तेः । तस्माद्वृतानां तत्तत्कर्मसु नाशौचम् । किन्तु बहुदिनसाध्यानि प्रारब्धस्तवपाठजपहोमादिकर्माणि कालप्रतीक्षासहानि चेत् । अशौचमध्येऽपि प्रत्यहमनुष्ठाय शौचान्त एव समाप्यानि । ११ ।

दुर्भिक्षप्राणरक्षाशमकरणविपत्त्यादिदेशादिभङ्गा-
दिष्वारम्भः समाप्तिः स्तवपठनजपादेर्भवेतां न दोषः ।
पूर्वारम्भे विवाहव्रतसदनजलाधारदेवप्रतिष्ठा-
दानश्राद्धादि कृच्छ्रादिकमघपतने स्यात् समाप्यं तदापि ॥ १२ ॥
कृच्छ्राद्यन्ताङ्गहोमद्विजभुजिकरणे दातृभोक्त्रोर्न दोषो-
नित्यासक्तस्य कृच्छ्रादिकविधिषु समारम्भणे नापि दोषः ।
आरम्भो नाम यज्ञे वरणमुपयमादौ तु नान्दीमुखं स्यात्
श्राद्धादौ पाकसिद्धिर्व्रतविधिषु च संकल्प उक्तोऽपि सत्रे ॥ १३ ॥

अशौचं नो भवेदित्यनुवृतौ ब्राह्मे -

नित्यं व्रतपरस्यापि कृच्छ्रचान्द्रायणादिषु ।
निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ॥

तथा च सन्ततकृच्छ्रचान्द्रायणाद्याचरणशीलस्य कृच्छ्राद्यारम्भेऽप्यशौचं नास्ति । कृच्छ्रहोमादिसमाप्तौ ब्राह्मणभोजनकर्मणि दातृभोक्त्रोश्च नाशौचम् ।

विष्णुः - आरम्भो वरणं यागे सङ्कल्पो व्रतसत्रयोः।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिष्क्रिया॥
निमन्त्रणं तु श्राद्धेऽपि आरम्भः स्यादिति स्मृतिः।

व्रतजापयोरिति पाठान्तरम्। निमन्त्रणपक्षस्यास्मद्देशे नादर एव 'श्राद्धादौ तु पचिक्रिये' त्यादि स्मृत्यन्तरे केवलपाकनिषिद्धेरेवोक्तत्वात्। १३।

आशौचान्नं सपिण्डाद्दत इतरजना दातुरत्तुर्द्वयोर्वा
ज्ञानेऽश्नीयुर्न कामादनवहिततयाऽद्युर्यदा वा समाधाः।
भुक्त्यर्द्धेऽघे तु दातुः पतति सति तदन्नाम्बुनी सन्त्यजेयु-
र्यागोद्वाहादिमध्ये सति तु यदपरे दद्युरन्नं तदद्युः॥ १४॥.

मनुः - उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।
यद्यन्नमत्ति तेषां तु दशाहेन विशुध्यति॥ (५-१०२)

उभयत्र सूतके मृतके चेत्यर्थः। अपि दातृग्रहीत्रोश्चेत्यादि पुराणवाक्याद्दातुरकालेऽन्नस्यादुष्टत्वेऽपि -

उभाभ्यामपरिज्ञाने सूतकं नैव दोषकृत्।
एकेनापि परिज्ञाने भोक्तुर्दोषमुदावहेत्॥

इति षट्त्रिंशन्मतवाक्याद्दोषः। या तु -

सूतकेऽपि कुलस्यान्नमदोषं मनुरब्रवीत्

इति यमोक्तिः। सा ज्ञातीनां स्ववंशान्नभुक्तिपरा।

अशौचमध्ये यत्नेन भोजयेच्च सगोत्रजान्।

इति ब्राह्मोक्तेः। आदित्यपुराणे -

विज्ञाते भोक्तुरेव स्यात् प्रायश्चित्तादिकं क्रमात्।

विष्णुः - 'ब्राह्मणानामशौचे यः सकृदेवान्नमश्नाति तस्य तावदेवाशौचं, यावत्तेषामशौचं, अशौचव्यपगमे प्रायश्चित्तं कुर्यात्। इति।

एवं च सकामाशौचान्नभोजने प्रायश्चित्तोक्तेस्तन्निषिद्धमेव। अकामभोजने तु अशौचिसमाशौचाचरणम्।

आदित्यपुराणे -

भोजनार्द्धं तु संप्राप्ते विप्रे दातुर्विपद्यते।
यदा कश्चित् तदोच्छिष्टं शेषं त्यक्त्वा समाहितः॥
आचम्य परकीयेन जलेन शुचयो द्विजाः।

विपद्यत इति जायत इत्यस्याप्युपलक्षणम्। तथा च षट्त्रिंशन्मते-

भुञ्जानेषु च विप्रेषु त्वन्तरा मृतसूतके।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः॥

पुनः आदित्यपुराणे -

विवाहयज्ञयोर्मध्ये सूतके सति चान्तरा।
शेषमन्नं परैर्दद्याद् दातृभोक्तृंश्च न स्पृशेत्॥

दद्याद् दापयेत् इत्यर्थः, न स्पृशेत् अशौचप्रयुक्तदोष इति शेषः। विवाहयज्ञयोरिति सर्वोत्सवोपलक्षणम्। तथा षट्त्रिंशन्मते -

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके।
परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः। १४।
प्रेतान्नं सूतिकान्नं यदि परसदने काऽपि सूते तदास्या -
प्योत्थानं नान्नमाद्यं परशवपतनेऽप्याशयमानिर्हतेर्न।
उत्थानं जन्मतः स्यादहनि तु दशमेऽथाग्निमत्सन्निदात्रो-
रामान्नं मृत्युशौचेऽस्थिचयनपरतः सूतके त्वादितोऽद्यात्॥ १५॥

न भुञ्जीतेत्यनुवृत्तौ मनुः - (४/२१२)

उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशम्।

पर्याचान्तं चाचमनस्थानस्थम्। यमः -

प्रेतान्नं सूतिकान्नं च द्वादशाहं यवान् पिबेत्।

इति यमोक्तौ प्रायश्चित्तोक्तेः तदन्नयोरभक्ष्यता। प्रेतान्नं प्रेतमुद्दिश्य शुचिनापि दत्तं सूतिकान्नं सूतिकामुद्दिश्य पक्वम्।

आपस्तम्बः - **अनुत्थितायां सूतिकायामन्तःशवेन च।**

अस्यार्थः। अशौचानधिकारिणोऽपि यस्य गृहे सूतिका, तदुत्थानपर्यन्तं तद्गृहे न भोक्तव्यमिति। एवं परगोत्रे शवे गृहे स्थिते तावत्कालं न भोक्तव्यमिति। **'उत्थानं जन्मतो दशमदिनम्'** इति नामकरणप्रस्तावे पारस्करसूत्रं लिखितम्। ननु अन्तःसूतके चेदुत्थानादाशौचं सूतकवदिति पारस्करसूत्रान्तरे एकादशदिने उत्थानपदं प्रयुक्तमिति चेत्? उच्यते। उत्थानादित्यत्र आङोऽभिविद्ध्यर्थता तथापि उत्थानदिनमभिव्याप्याशौचमिति। एकादशदिने अशौचापगम इति न कश्चिद् विरोधः।

अङ्गिराः **'न दोषश्चाग्निहोत्रिणाम्'।**

सूतके शाव आशौचे त्वस्थिसंचयनात् परं।

अन्नसत्रप्रवृत्तानामाममन्नं विगर्हितम्॥

भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु व्रती भवेत्।

अग्निहोत्रिणां सदान्नदानशीलानां च मृतिकाशौचे पञ्चदिनप्रभृत्यामान्नग्रहणे सूतके आद्यदिनतोऽपि आमान्नग्रहणे च न दोषः। पक्वान्नभक्षणे प्रायश्चित्तम्॥ १५॥

अग्निषोमीयपर्यन्तमपि नहि मतं दीक्षितस्यान्नमाश्यं

किन्त्वापद्येव सोमक्रयण इहकृते भोज्यमेवं विपत्तौ।

यज्ञेऽपेक्ष्यं हि यद्यद्द्रविणमिदमवस्थाप्य वाद्यं तदन्यत्

चातुः प्राश्ये तु भक्ष्यं नहि निगदितमाधानकर्माङ्गभूते॥ १६॥

सौम्यः - **ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा।**

जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्॥

ब्रह्मौदनं आधानाङ्गभूतं चातुः प्राश्यम्। अत्र चत्वारो ऋत्विजः प्राशन्तीति विधिः। सोमेऽग्निषोमीयपशुपर्य्यन्तम्। 'अग्निषोमीयसंस्थायां यजमानस्य गृहे न भोक्तव्य'मिति श्रुतेः। 'क्रीतराजको भोज्यान्यः' इति आथर्वणश्रुति-रापद्विषया। क्रीतो राजा सोमो येन स तथोक्तः। यज्ञार्थे वा विनिर्दिष्टे भोक्तव्यम्। अस्यार्थः। यज्ञार्थं यावद्द्रव्यमपेक्षितं तावति द्रव्ये पृथक् कृते अवशिष्टादीक्षितस्यान्नं भोक्तव्यमिति एतदप्यापद्विषयम्॥ १६॥

दुग्धे दध्याज्यतैलाञ्जनफललवणक्षौद्रमांसेषु मूल-
कादौ काष्ठे च मूलौषधतृणसुमनःशस्यशाकेषु पुण्ये।
पक्के सक्तौ यवादौ पचनविरहिते तण्डुलादौ न दोषः
किन्त्वाशौची न दद्यात् पर उत वितरेन्नाददीत स्वयं वा॥ १७॥

मरीचिः - लवणे मधुमांसे च पुष्पमूलफलेषु च।
शाककाष्ठतृणेष्वेवं दधिसर्पिःपयोऽप्सु च॥
तैलौषधाञ्जने चैव पक्वापक्वे स्वयंग्रहे।
पण्येषु चैव सर्वेषु नाशौचं मृतसूतके॥

अत्र पयःपदं दधिसाहचर्याद्दुग्धपरम्। पक्कं सक्तुमोदकगुडादि। अपक्कं तण्डुलादि। स्मृत्यन्तरे -

लवणं सर्पिर्मांसं च पुष्पमूलफलानि च।
काष्ठं शाकं तृणं तोयं दधि क्षीरं घृतं तथा॥
औषधं तैलमञ्जनं शुष्कमन्नं च नित्यशः।
अशौचिनां गृहाद् ग्राह्यं स्वयं शस्यं च मूलकम्॥

एतत्सर्वमशौचिगृहगतमपि स्वयं गृह्यमाणं न दोषावहम्। अशौचिना चेद्दीयेत तर्हि दुष्टमेव। तथा च अशौचीतरदीयमानमपि न दोषावहम्। अत्र वाक्ये शुष्कान्नपदेन तण्डुलादेर्ग्रहणम्। ननु वाक्यद्वयेऽपि अशौचिगृहस्थितजलस्यापि ग्राह्यत्वमिति चेन्न। तस्य त्वत्यन्तासम्भवे त्वयाचितविषयत्वात्। अन्यथा -

सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः।
पिवेत् पानीयमज्ञानात्सम्यक् स्नायात् स्पृशेत वा ।।
पानीयपाने कुर्वीत पञ्चगव्यस्य भक्षणम्।

इत्याद्यङ्गिरः (उत्त. ८/१९-२०) प्रभृतिवाक्यमनर्थकं स्यात्। 'भोजनकाले अशौचपाते तु अन्यस्य गृहाज्जलमानीय आचमनीयम्' इत्याद्यपि व्यर्थं स्यात्। १७।

विप्रादाशौचयुक्ताद् दलनप्रभृतिभिः संस्क्रियाभिर्विशोध्यं
धान्याद्यं ग्राह्यमाणं गदितमपि विपत्तौ तु पक्वान्नवर्ज्जम्।
विप्रैः सच्छूद्रजातेः परमिह तु पणाः कार्षिकास्ताम्रिकाख्या
ग्राह्या उक्त अतोऽस्मिन् रजतमपि हिरण्यादिकं ग्राह्यमाहुः।। १८ ।।

अङ्गिराः - संस्कारैः शुध्यति ह्यामं धान्यं तेन शुचि स्मृतं।
तस्माद्धान्यं ग्रहीतव्यं मृतिसूतान्तरेष्वपि ।।
पक्वान्नवर्ज्जं विप्रेभ्यो गोधान्यं क्षत्रियात्तथा।
वैश्येभ्यः सर्वधान्यानि शूद्राद् ग्राह्याः पणास्तथा।। (उत्त. ८-१०)

संस्कारैः दलनादिभिः। 'एतच्चापद्गतस्य' इति कल्पतरुकाराः। ताम्रिकाः कार्षिकाः पणाः । पणानां ग्राह्यत्वोक्तेः । रजतादीनामपि ग्राह्यत्वमित्यभियुक्ताः ।। १८ ।।

पूर्वाशौचेऽपि तातः सूता जनुषि विलोक्यास्यमस्याप्यदृष्ट्वा
वा नाडीच्छेदनात् प्राक् शुचिरभिपवणाद् गोसुवर्ण्णादि दद्यात्।
न स्नानं षण्ढपुत्र्योर्जनुपि भवति संसर्गजाशौचपाते
पित्रोस्तद्गृह्यवित्तैरपि तनयमुखा वैश्वदेवादि कुर्युः ।। १९ ।।

अभिषवणात् स्नानात्। प्रजापतिः -

अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचं न बाधकम् ।।

अत एवैतदनापद्विषयम्।

पारस्करः (१-१६-३)

जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति।

इति जातकर्म उक्तवान्। शङ्खलिखितौ -

'कुमारप्रसवे नाड्यामच्छिन्नायां गुड-तिल-हिरण्य-वस्त्र-प्रावरण-गोधान्यप्रतिग्रहेऽप्यदोषः।'

अपिशब्दात् कुमारप्रसवनिमित्त-दत्तद्रव्यान्तरपरिग्रहेऽप्यदोषः।

सुमन्तुः - **सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः।**

कृत्वा सचेलं स्नानं तु शुद्धो भवति तत्क्षणात्॥

सम्वर्त्तः - **जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते।**

एतद्वाक्यात् पुत्रमुखदर्शनाभावेऽपि पितुः स्नानम्। कन्योत्पत्तौ तु पितुः स्नानाभावः। तथा चाङ्गिराः -

नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति।

रजः स्रवति च स्त्रीणां तच्च पुंसि न विद्यते॥

पुंसः पितुः। रजःप्राबल्ये स्त्रीजननात् यस्या रजः, तस्या एवाङ्गाशौचं, न पितुः। जननीस्पर्शने तु पितुरपि स्नानं वक्ष्यति। तथा च अङ्गाशौचापगमार्थं दुहितृजनुषि स्नानाभावः। एवं च स्नानोपस्पर्शनादेव पिता शुद्ध इति वाक्यस्य पुंजननविषयत्वम्। नपुंसकोत्पत्तावपि भूयसः स्त्रीधर्मस्य दर्शनात् स्नानाभावः।

तथा च जैमिनिसूत्रं - **'विरोधिधर्मसमवाये भूयसां स्यात्सधर्मत्वम्'** इति। अत एव एतत्सर्वं विविच्य कालिदासचयनिभिरप्युक्तं

'पुत्रीमज्जनतोऽथ सर्वजननीस्पर्शे दशाहाच्छुचिः' (श्लो. २)। इति।

पुत्री पुत्रवान्, न तु तातादिशब्दः प्रयुक्तः। गृहपतेर्वक्ष्यमाण-स्वगृहस्थित-दुहितृप्रसवनिमित्तादिसंसर्गाशौचे पुत्रादिद्वारैव वैश्वदेवादि करणम्। सर्वार्थत्वाद् वैश्वदेवक्रियादीनामलोपः। तथा चाङ्गिराः -

अशौचं यस्य संगर्गाज्जायते गृहमेधिनः ।

क्रियास्तत्र विलुप्यन्ते गृह्याणां न च तद्भवेत् ॥

गृह्याणां गृहभवपुत्रादीनां, गृहद्रव्याणां च इत्यर्थः। १९ ।

स्मार्त्ताग्नौ कर्म किंचिन्न भवति तु कृतः पौर्ण्णमास्यः चरुश्चे-

दारब्धत्वात् समाप्यो भवति किल तदाशौचपातेऽपि दर्शे ।

श्रौताग्नावग्निहोत्राहुतिमुखमखिलं नित्यकर्माप्यशौचे

स्नानात्तत्कर्मशुद्धेः स्वयमपि कुलजैरन्यगोत्रैश्च कार्यम् ॥ २० ॥

यद्यपि - अकृतं हावयेत् स्मार्त्ते तदभावे कृताकृतं ।

तथा - कृतमोदनसक्त्वादि तण्डुलादि कृताकृतं ।

व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ॥

इति छन्दोगपरिशिष्टे (३/६१-६२) उक्तम्। जावालिनापि -

जन्महानौ वितानस्य कर्मत्यागो न विद्यते ।

शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ॥

इत्युक्तम्। शालाग्निः स्मार्त्ताग्निः। केवलशब्दात् पक्षादिपिण्डपितृयज्ञादि निषेधः।

पितृयज्ञं चरुं होममसगोत्रेण कारयेत् ।

इति जातुकर्ण्णवाक्यात् चरुपिण्डयज्ञयोर्विकल्प इति। तथापि -

सूतके मन्त्रवत्कर्म स्मार्त्तं नैव समाचरेत् ।

इति स्मृतेर्न किञ्चित् स्मार्त्ताग्नौ कुर्वन्ति। किन्तु स्मार्त्ताग्नावपि पौर्ण्णमास्यचरौ कृते त्वमावास्यायामशौचपाते त्वारब्धत्वात् समापनमेव।

पौर्ण्णमास्यादि दर्शान्तमेकं कर्म प्रचक्षते ।

इत्युक्तेः। श्रौताग्नौ तु पारस्करः -

"नित्यानि विनिवर्त्तेरन् वैतानवर्ज्जम्" ।

वैतानिकानि नित्यान्यत्र दर्शपौर्णमासाश्रयणाग्निहोत्रचातुर्मास्यादीनि। व्याघ्रपादः-

श्रौते कर्मणि तत्कालं प्रातः शुद्धिमवाप्नुयात्।

अशौचमध्येऽपि ऋत्विक् यजमानश्चेत्यर्थः।

मनुः - **न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत्।** (५-८४)

सनाभ्यः सपिण्डः, तत्कर्म श्रौतेषामृत्विजं असगोत्राभावे कर्म कुर्वाणो नाशुचिर्भवेदित्यपि शब्दार्थः॥ २० ॥

नित्यः सोमोऽपि तद्वत् पशुरुपरि तयोः पर्वसत्वान्न कार्या -
वन्ते पर्वण्यशौचं यदि पतति नवान्नेष्टिरनागते स्यात्।
नाशौचे स्यात् प्रवासो न च भवति निजस्त्र्यार्त्तवे स्याद्विपत्तौ
सोऽप्यत्राथ प्रवेशो न च भवति भवेत्पर्वपाते तु सोऽपि॥ २१ ॥

निरूढपशुबन्धसोमयोर्नित्ययोरपि पर्वान्तरसावकाशत्वात् नाशौचेऽनुष्ठानम्। आग्रयणमप्यन्तिमपर्वगतमनन्यगतिकत्वात् अन्ते कार्यम्।

सूतके मृतके चैव यस्य भार्य्या रजस्वला।
प्रवासे गमने तस्य पुनराधानमिष्यते॥

इत्याशौचे पत्न्या रजस्यपि प्रवासो निषिद्ध एव। तथाप्यात्ययिके कार्ये शुद्धिविधानादेव विपत्तौ तु प्रवासे कार्ये अग्न्युपस्थापनं कार्यम्। तथा प्रवेशोपस्थापनं च पर्वसन्निधावावश्यकत्वात् कार्यमेव॥ २१ ॥

पित्रोर्मध्ये दशाहं यदि भवति सुतः साग्निको दर्शपाते
त्यक्त्वास्मिन् पैत्रयज्ञं सकलमनुचरेच्छ्रौतदर्शोक्तकृत्यं।
अस्मिंस्तावत् सपिण्डीकरणमृषिगिरा यन्निषिद्धं विना तत्
नो युक्तः पिण्डयज्ञः तदितरविहितश्रौतलोपः कुतः स्यात्॥ २२ ॥

स्मृतिसंग्रहे - **दशाहाभ्यन्तरे यस्य सपिण्डीकरणं भवेत्।**
प्रेतत्वं सर्वदा तस्य यावदाभूतसंप्लवम्॥

काष्र्णाजिनिः -

सपिण्डीकरणं कुर्यात् पूर्ववच्चाग्निमान् सुतः ।
परतो दशरात्राच्चेत् कुहूरब्दोपरीतरः ॥

इतरोऽनग्निः । जावालिः -

नासपिण्ड्यग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।
पापी भवत्यकुर्वन् हि पितृहा चोपजायते ॥

असपिण्डी सपिण्डनमकृत्वेति कल्पतरुकाराः । एवं च दशाहमध्ये दर्शपाते सपिण्डीकरणस्यात्र निषिद्धत्वात्सपिण्डीकरणं विना च पिण्डपितृयज्ञानुष्ठानस्य निषिद्धत्वात्तमेव विना श्रौतमन्यदर्शकर्म कार्यमित्यभियुक्ताः । मातुः पिण्डपितृयज्ञे प्रवेशाभावेऽपि -

एकादशाहं निर्वर्त्त्यार्वाक् दशाहाद्यथाविधि ।
प्रकुर्वीताग्निमान् पुत्रो मातापित्रोः सपिण्डनम् ॥

इति वाक्यान्मातुरपि सपिण्डीकरणं कृत्वैव पिण्डपितृयज्ञकरणमिति, मातृदशाहमध्येऽप्येवं, विमातुस्तु स्वकाल एव सपिण्डनमिति वक्ष्यते ॥ २२ ॥

साग्निस्त्वेकादशाहे यदि पतति कुहूर्द्वादशाहेऽथवान्या
शौचे कृत्वा सपिण्डीकृतिमपि तनुयाच्छ्रौतदर्शोक्तकृत्यं ।
यागोऽशौचे समाप्यो यदि भवति रजो योषितो यागमध्ये
तच्छुद्धौ तत्समाप्तिस्त्वघविगमभवेत् पर्वके जातकेष्टिः ॥ २३ ॥

बृहस्पतिः -द्वादशैकादशे वाह्नि साग्निः कुर्यात् सपिण्डनं ।
शावाशौचस्य मध्येऽपि कुर्यादेवाविशंकयन् ॥

इति पुत्रस्य साग्निकत्वे द्वादशाहे दर्शपातेऽशौचेऽपि द्वादशाहे सपिण्डीकरणम् । एकादशाहदिने दर्शपाते तु एकादशाह एव । अशौचानन्तरं दर्शपाते तु अशौचापगमदिने सपिण्डनम् । देये पितृणामित्युक्तेः ।

ब्राह्मे - **गृहीतमधुपर्कश्च यजमानश्च ऋत्विजः ।**
पश्चाद्दशाहे पतिते न भवेदिति निश्चयः ॥
तद्वद् गृहीतदीक्षस्य त्रैविद्यस्य महामखे ।
स्नानं त्ववभृथे यावत्तावत्तस्य न विद्यते ॥

ऋत्विजां मधुपर्कग्रहणानन्तरं यजमानस्य दीक्षायाः पश्चात् पतितमशौचं तत्कर्मसमाप्तिपर्यन्तं न लगतीत्यर्थः । तथाऽशौचेऽपि यागसमाप्तौ न दोषः । यागस्य मध्ये पत्नीरजोदर्शने तच्छुद्धावेव यागसमाप्तिः । **'यस्य पत्नी अनालम्बुका स्यात् तामवरुध्य यजेत'** इति श्रुतेः । अनालम्बुका रजोवती । श्रौतमपि जातेष्ट्यादिकं अशौचापगमपतिते आद्ये पर्वणि कार्यं, नाशौचमध्ये । तथा च पूर्वमीमांसायां चतुर्थाध्याये तृतीयपादोनविंशाधिकरणस्य संग्रहकारिकामाधवीये -

जातकर्मानन्तरं स्यादशौचापगतेऽथवा ।
निमित्तसंनिधेराद्याः कर्त्तृशुद्ध्यर्थमुत्तरः ॥ इति ॥

अशौचानन्तरकार्या जातेष्टिरशौचानन्तरपतिते पर्वण्येव । **'य इष्ट्वा पशुना सोमेन वा यजेत'** इति श्रुतेः । सामान्यतः सर्वासामिष्टीनां पर्वण्येव विधानात् । २३ ।

अङ्गाशौचं समग्रे भवति हि मृतके व्याप्य तुर्याहमस्मिन्
खण्डे भागं तृतीयं, न तु जनुषि कुले, स्नानमस्मिंस्तु वपुः ।
मातुः सूत्यन्तमेव स्पृशति यदि पिता तां तदन्तः ससूत्या-
शौचेऽङ्गाशौचयुक्ता अपि कुलजजना द्व्यादिसर्वाघयोगे ॥ २४ ॥

सम्वर्त्तः - **ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ।**
ततः पूर्वमङ्गाशौचमित्यर्थः । अङ्गिराः -

चतुर्थेऽहनि कर्त्तव्यः संस्पर्शो ब्राह्मणस्य तु ।
क्षत्रस्य पञ्चमे ज्ञेयः सप्तमे च तथा विशः ।
शूद्रस्य दशमेऽप्येवं खण्डाशौचे त्रिभागतः ॥

क्षत्रस्य पञ्चम इत्यादि तु क्षत्रियादीनां द्वादशाहाद्यशौचपक्षे। अस्मद्देशे तु सर्ववर्ण्णानां दशाहाशौचपक्षाश्रयणात् चतुर्थेऽहन्येवास्थिसंचयनं तदुत्तरमङ्गाशौचनिवृत्तिः।

देवलः - अशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः।

सूतके तु सूतिकां विना कुलेऽङ्गाशौचाभावः। तथा चाङ्गिराः -

सूतके सूतिकावर्जं संस्पर्शेनैव दुष्यति।

ब्राह्मे तु विशेषः -

अन्यास्ता मातरस्तद्वत् तद्गृहं न व्रजन्ति चेत्।

सपिण्डाश्चैव संस्पृश्याः सन्ति सर्वेऽपि नित्यशः॥

शङ्खलिखितौ - **'स्नानोपस्पर्शनादेव पिता शुद्धः,**

नाडीच्छेदनात्परं दशरात्रपर्यन्तं मातुरप्यङ्गाशौचम्।'

तथा च हारीतसूत्रं **'अत ऊर्द्ध्वमसमालम्भनमादशरात्रादिति।'**

देवलोऽपि **'माता शुध्येद्दशाहेन।'** इति।

यदि पत्न्यां प्रसूतायां नरः सम्पर्कमृच्छति।

सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित्॥

पारस्करः **'स्पर्शतश्च पितुर्नेतरेषाम्।'**

इत्यनेन षडङ्गविदपि ब्राह्मणः पिता सूतिकास्पर्शे दशरात्रपर्यन्तमङ्गाशौची इत्यर्थः। अन्येषां तु तत् स्पर्शे स्नानमात्रम्। तथा चाङ्गिराः -

संस्पर्शे सूतिकायाश्च स्नानमात्रं विधीयते।

ज्ञातीनामपि द्वित्रिचतुरादि यत्किञ्चिदशौचसन्निपाते त्वशौचापगमान्तमङ्गाशौचम्।

तथा च ब्राह्मे - **सर्वमङ्गमसंस्पृश्यं तत्र स्यात् सूतके सति।**

सूतकमध्ये सूतके नितरां मृतकमध्ये मृतके। २४।

पित्रोर्मृत्यां शरीरं गृहमशुचि भवेद् वर्षमेकं न दैवं

पित्र्यं कर्मापि काम्यं परगृहपचनक्षौद्रमांसाशनं च।

स्वाध्यायान्याब्दिकाद्युत्सवशुभकरणं क्षेत्रतीर्थादि न स्यात्
किन्तु स्युर्नित्यनैमित्तिककरणपरप्रेतकृत्यान्यपीह ।। २५ ।।
षण्मासान् स्याद्विमातुर्मरणमिदमघं व्याप्य भार्याविनाशे
त्रीन् मासान् स्यादशौचं गदितमपि सुतभ्रातृनाशे त्रिपक्षान् ।
तन्मध्ये चेत् सपिण्डीकरणमपि कृतं काम्यकृत्येऽपि वृत्ते
द्रव्यादानादिरूपेऽधिकृतिरपि मता पूर्त्त इष्टेऽपि तत्र ।। २६ ।।
इष्टं त्वातिथ्यमुक्तं श्रुतिपठनतपःश्रौतशालाग्निकार्या-
न्तर्वेदीदानमुक्तं स्मृतिषु निगदितं वैश्वदेवोऽपि सत्यम् ।
दानं नित्यव्रताङ्गं ग्रहणमिहिरसंक्रान्तिदाने च पैत्रे
यज्ञश्चारामनीराशयसुरसदनान्यन्नदानं च पूर्त्तम् ।। २७ ।।
नोद्वाहे दारसत्त्वे त्वधिकृतिरितरान्नादिभुक्तौ महे नो
दर्शादौ दीपदाने निवपत इह न प्रेतपक्षे गयायां ।
नान्येषां तर्पणेनाब्दिक इव जननीवार्पिके नाधिकार -
स्ताताब्देऽथास्ति तातब्दिक इह जननीवर्षमध्येऽधिकारः ।। २८ ।।

इति चतुर्भिर्कुलकम् । अन्याब्दिकादि इत्यनेन पितृव्यादि तर्पणस्यापि संग्रहः । इतरान्नादित्यनेन मांसमाक्षिकयोः संग्रहः । महे उत्सवे । दर्शादीत्यनेन अष्टकान्वष्टकायुगाद्यादीनां संग्रहः । निवपनं निवापः । श्राद्धमिति यावत् । दीपदाने प्रदीपामावास्यायां दीपदाने । गयायामिति लक्षणया गयाश्राद्धे । अन्येषां पितृव्यादीनामिव शब्देन यथा पित्रोर्वर्षमध्ये पितृव्यादितर्पणश्राद्धे न कार्ये । तथा जनकवर्षे जननीवार्षिकमपि न कार्यमित्यर्थः । जननीवर्षे तु जनकसाम्वत्सरिकं कार्यमितीयान् मातृतः पितुर्भेद इति सूचनार्थमथशब्द उपात्तः ।

विश्वामित्रः -

पिता चोपरमेद् यस्य गृहं तस्याशुचिर्भवेत् ।

पितेति माताप्युपलक्ष्यते । गृहमिति देहोऽपि । तथा च देवीपुराणे-

प्रमृतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।

न दैवं नापि पित्र्यं स्याद् यावत्पूर्णो न वत्सरः ॥

महागुरुनिपाते च सर्वकर्माणि वर्ज्जयेत् ।

महागुरु मातापितरौ । पुनर्विश्वामित्रः -

स्नानं चैव महादानं स्वाध्यायं चान्यतर्पणं ।

प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने ॥

स्नानमिति तीर्थस्नानम् । तीर्थस्नानं महादानम् इत्येतत्समानं यमोक्तेः । स्वाध्यायो वेदपाठः । अन्यतर्पणमिति पितृव्यादि श्राद्धमुपलक्ष्यते । शातातपः -

अन्यश्राद्धं परान्नं च मधु मांसं च मैथुनं ।

वर्ज्जयेदब्दमेकं च महागुरुनिपातने ॥

मधु क्षौद्रं, मैथुनं विवाहः । यमः 'माङ्गल्यमुत्सवं काम्यम्' इति निषेधं प्रकृत्योवाच इति सामान्यतोऽशौचप्रकरणेऽपि तथैव काम्यं **'यत्कर्म वत्सरात् प्रथमादृत'** इति व्याघ्रोक्तेः काम्येष्वनधिकारो न नित्यनैमित्तिकयोः । तथा -

अन्येषां प्रेतकार्याणि महागुरुनिपातने ।

कुर्युः सम्वत्सरात् पूर्वं नैकोद्दिष्टं न पार्वणम् ॥

इति बृहन्मनूक्तेः । पितृव्यादीनां प्रेतकार्याणि **'नैकोद्दिष्टं न पार्वण'** मिति कुलभेदेन द्विविधमप्याब्दिकं न कार्यम् ॥ २५ ॥

विमात्रादिविषये बृहन्मनुः -

पित्रोरब्दमशौचं स्यात् षण्मासान् मातुरेव च ।

मासत्रयं तु भार्यायास्तदर्द्धं भ्रातृपुत्रयोः ॥

मृताविति शेषः । मातुरिति विमातुः, पित्रोरिति पूर्वमुक्तत्वात् ।

'कनिष्ठमातुः षण्मासान् मातापित्रोस्तु वत्सरम् ।'

इति वाक्यान्तरात् अपकृष्य सपिण्डीकरणे कृते काम्येष्वप्यधिकारः। तथा प्रतिग्रहादिष्वपि। तथा च मात्स्ये -

सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभाक् भवेत्।

वृत्तं प्रतिग्रहादि, इष्टं यागादि, गृहस्थो भवेदित्यनेन पुत्रः स्वविवाहं कुर्यात्। गृहस्थपदस्य संगृहीतदार एव मुख्यार्थत्वात्। ननु गृहस्थाश्रमविहितकर्मानुष्ठान-योग्यतापरत्वमस्तु ? इति चेन्न। लक्षणाप्रसक्तेः मुख्यार्थसम्भवे लक्षणाया अनङ्गीकारात्। २६।

अत्र पूर्तेष्टयोः परिगणनं पूर्वाचार्यैः कृतम्। तथा चाग्नेयपुराणे-(२०९/२)

वापीकूपतडागादि देवतायतनानि च।
अन्नप्रदानमारामाः पूर्त्तधर्मं च मुक्तिदम्॥

तथा - **ग्रहोपरागे यद्दानं सूर्यसंक्रमणेपु च।**
द्वादश्यादौ च यद्दानं पूर्त्तं तदपि नाकदम्॥ (२०९-४)

कात्यायनः **'आहिताग्नेः पित्रर्चनं पिण्डैरेव, तथा ब्राह्मणानपि भोजयेत्'।**

पूर्त्तैरिति। इष्टलक्षणं महाभारते -

एकाग्निहोत्रहवनं त्रेतायां यच्च हूयते।
अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते॥

जातुकर्ण्णः - **अग्निहोत्रं तपः शौचं वेदानां चानुपालनं।**
आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते॥

द्वादश्यादीत्यादिपदेन जन्माष्टम्यादिव्रताङ्गदानसंग्रहः। एतेन क्षेत्रतीर्थादि यात्रादीनाम् अत्रानुक्तेर्न तत्करणम्। समाचारश्चैवमेव॥ २७॥

तता वचनबलाद् भार्यायां विद्यमानायां विवाहान्तरकरणाभावः। एवं मातापित्रोवर्षे सपिण्डीकरणे कृते पितृव्यादितर्पणं श्राद्धादिकं न कार्यम्। यमः।

माङ्गल्यमुत्सवं चैव परपाके च भोजनं।
प्रथमेऽब्दे न कुर्वीत योजनेऽपि कृते सति॥

मधु मांसं परान्नं च मैथुनं चान्यतर्पणं ।
प्रथमेऽब्दे न कुर्वीत सपिण्डीकरणेऽकृते ।।

वृद्धमनुः -दीपदानं गयाश्राद्धं श्राद्धं चापरपाक्षिकं ।
प्रथमेऽब्दे न कुर्वीत योजनेऽपि कृते सति ।।

मैथुनमत्र विवाहः । विवाहं विना मैथुनत्वासम्भवात् । ननु **'गृहस्थश्च ततो भवेत्'** इत्युक्तौ विवाहः कार्य इत्युक्तम् । अत्र च निषेध इत्युभयोः कथं सङ्गतिरिति चेदुच्यते । विद्यमानपत्नीकेन पत्न्यन्तरस्वीकारो न कार्य इत्युभयोर्न विरोधः । तथा च पूर्वमविवाहितो मृतपत्नीकश्च विवहेदिति निष्कर्षः । तदेतत् विविच्य **'नोद्वाहे दारसत्त्वे'** इत्यस्मत्कारिकायां निबद्धम् । वृद्धमनूक्तौ आपरपाक्षिकमिति अपरपक्षे विहितामावास्याश्राद्धम् । एतदष्टकान्वष्टकायुगाद्यादीनामुपलक्षणम् । अत एव प्रेतपक्षश्राद्धमपि न कार्यम् । तस्य नित्य-काम्यत्वात् । 'पितर्युपरत' इति वक्ष्यमाणोक्तेः । मातापितृविषये बृहन्मनुः -

पितर्युपरते पुत्रो मातुः श्राद्धान्निवर्त्तते ।
मातर्यपि च वृत्तायां पितुः श्राद्धादृते समाः ।।

समाः साम्वत्सरिकं वर्ज्जयित्वा इत्यर्थः । इदं सन्निहितवाक्येनैव सम्बध्यते । न पूर्ववाक्येनापि ।

मातर्यपि च वृत्तायां श्राद्धं कुर्वीत पैतृकं ।
तस्या न वत्सरं कुर्यात् प्रेते पितरि च क्वचित् ।।

'इति शंखोक्ते' रिति, कृत्यकौमुदीकारादयः (पृ- २२४) । कुर्यादिति पुनरुपादानात् नञः पूर्ववाक्ये सम्बन्धशङ्का नास्त्येवेति तन्मतं समीचिनम् । तस्माज्जनकमरणाब्दे मातृवार्षिकमपि न कार्यम् । मातृमरणाब्दे तु पितृवार्षिकश्राद्धमात्रं कार्यम् । इतीयानेव भेदः । अमावास्यादि नित्यश्राद्धानि उभयोरप्यब्दे न कार्याणि इति सिद्धान्तः । अत्र यद् विप्रमिश्रै 'ऋते समाः' इत्युभयत्रापि योजयित्वा अस्मद्देशे निर्विगानं मातृसाम्वत्सरिकानुष्ठानाद्यसम्बन्ध-

व्यवायाभावादनुषङ्गाधिकरणन्यायसम्भवादुभयोः सम्वत्सरे उभयोः साम्वत्सरिकं कार्यमिति यल्लिखितं, तन्न विचारसहम्, इत्यस्मत्पितृचरणाः।

तथाहि पूर्वमीमांसायां द्वितीयाध्याय-प्रथमपादे त्रीण्यनुषङ्गाधिकरणानि।

तत्र ज्योतिष्टोमे उपसद्धोमेष्वेवमाम्नायते। 'या ते अग्नेऽयाशया तनुर्वर्षिष्ठा-गृह्यशेष्ठा। उग्रं वचो अपावधीत् त्वेषां वचो अपावधीत् स्वाहा। जाते अग्ने रजाशया' इति विषयवाक्ये स्वाहान्तः प्रथमो मन्त्रः सम्पूर्णवाक्यत्वात् निराकांक्ष्यः। द्वितीयतृतीयमन्त्रयोः सन्देहः।

एतयोः किं लौकिकाध्याहारेणाकांक्षा पूरणीया उत, वैदिकवाक्यशेषेणाकांक्षा पूरणीया इति।

तत्र 'तनुर्वर्षिष्ठ' इत्यादि मन्त्रभागस्य प्रथममन्त्रत्वात् न तयोरन्वेतुं योग्य इति पूर्वपक्षः। वैदिकयोर्मन्त्रयोः आकांक्षा वैदिकेनैव वाक्यशेषेण पूरणीयेति तनुर्वर्षिष्ठेत्यादिभाग उत्तरयोरनुषज्यत इति सिद्धान्तः।

द्वितीयाधिकरणं यथा - ज्योतिष्टोमे दीक्षाप्रकरणे पठ्यते 'चित्पतिस्त्वा पुनातु', 'वाक्पतिस्त्वा पुनातु', 'देवस्त्वा सविता पुनातु'। 'तु अछिद्रेण पवित्रेण वसो राश्मिभि' रिति तथा इति विषयवाक्ये अछिद्रेणेत्यादि मन्त्रभागस्तृतीयभागविशेषः। स किं प्रथमद्वितीयमन्त्रयोर्नानुषज्यते आहोस्विदनुषज्यत इति सन्देहे 'चित्पतिस्त्वा पुनातु' इत्यनयोः शेषिणोः संपूर्णवाक्ययोर्न काचित् शेषाकांक्षाऽस्तीति पूर्वपक्षः। शेषिणः आकांक्षाविरहेऽपि शेषस्य पवित्रेण रश्मिभिरित्यन्तस्य क्रियासापेक्षत्वात् पूर्वयोरनुषंग इति सिद्धान्तः। तृतीयमाक्षेपाधिकरणं यथा -

अग्नीषोमीयपशौ श्रूयते। सं ते प्राणो वातेन गच्छताम्। समंगानि यजत्रैः संयज्ञपतिराशिषेति विषयवाक्ये संयज्ञपतिराशिषेति तृतीयमन्त्रे गच्छतामित्यस्यानुषंगो न वेति सन्देहे समित्युपसर्गस्य क्रियापदस्याकांक्षत्वात् प्रथममन्त्र अस्य गच्छतामिति

पदस्य एकवचनान्तस्य यज्ञपतिशब्देनान्वेतुं योग्यत्वात् पूर्ववदुद्देश्यत्वेन सन्निहितत्वादाकांक्षासन्निधियोग्यतानां तद्भावे तस्यानुषंग इति पूर्वपक्षः।

स गच्छतामित्येकवचनस्य संयज्ञतैरंगानीत्यनेन सम्बद्धमयोग्यत्वान्नानुषङ्गः। तद्व्यबधानेन आकांक्षाया अभावात् नितरां संयज्ञपतिराशिषेति तस्मान्नानुषङ्गः। किन्त्वध्याहार्य्यं क्रियापदं निराकांक्षकर्त्तव्यमिति सिद्धान्तः। तथा वद्धव्यवायाभावेनानुषङ्गनिमित्तं बहु आकांक्षादिसद्भाव एवानुषङ्गो प्रवृत्तः।

तथाहि अनुषङ्गाधिकरणेषु असंबद्धव्यवायाभावो नानुषङ्गनिमित्तम्। किन्तु आकांक्षासद्भाव एव तन्निमित्तमिति विचारितम्। 'पितर्युपरत' इति वाक्ये आकांक्षादिविरहान्नानुषङ्गप्रसङ्गोऽपि। अनेनैव स्वारस्येन 'मातर्यपि चे' ति वाक्यस्य प्रामाण्ये मातृसाम्वत्सरिके विकल्प इति तैरप्युक्तम्। शंखस्मृतौ तद्वाक्यस्योपालम्भादप्रामाण्यशङ्का दूरापास्तैव। यच्चोक्तं विकल्प इति, तत्रापि प्रष्टव्यम्। किं वाक्ययोर्विरोधाद् विकल्प कल्पनीयः ? अथवा स्मृत्याचारयोरिति ? तत्र न प्रथमः। उभयोर्वाक्योरपि जनकसम्वत्सरे मातृसाम्वत्सरिकानुष्ठानाभावस्य स्पष्टमभिहितत्वेन विरोधाभावात्। तस्माद्द्वितीयः पक्ष आश्रयणीयः। सोऽप्ययुक्तः। तथाचारस्य कृत्यकौमुद्यादिषु अलिखितत्वेन अनादृतत्वात्। स्मृत्यपेक्षया द्व्यन्तरितप्रामाण्यादाचारस्य दुर्बलत्वमिति सिद्धान्ताच्चेत्यलमतिविस्तरेण। इति कारिकाचतुष्कस्य। २८।

अथ बाह्याशौचशुद्धिः

सर्वे वर्ण्णा अहोभिर्दशभिरिहगतैः सङ्कराश्चानुलोम्यो-
त्पन्नाः शुध्यन्त्यथो तेऽभिपवणशुचयः प्रातिलोम्योद्भवाश्चेत्।
विंशत्या स्त्री शुचिः स्यात् सुतजनुषि दिनैस्त्रिंशता स्त्रीप्रसूतौ
योषित् पुंसोर्यमत्वाज्जनुषि गुरुसदृग्भागतस्त्रिंशतैव ॥ २९ ॥

यद्यपि - शुध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥

इति मनुनोक्तं (५-८३), तथापि अस्मद्देशे-

सर्वेषामेव वर्ण्णानां सूतके मृतके तथा।

दशाहात् शुद्धिरथवा इति शातातपोऽब्रवीत् ॥

इत्यङ्गिरोवाक्यानुसारमस्मद्देशे सर्वेषां वर्ण्णानां दशाहाशौचसमाचारः। दशाहेन इत्यादौ गतेनेति शेषः। अनुलोमसंकराणामपि दशाहाशौचम्। तथा च ब्राह्मे - **शौचाशौचं प्रकुर्वीरन् शूद्रवद् वर्ण्णसंकराः।**

इति प्रतिलोमसंकराणां नु मूत्रपुरीषोत्सर्गवत् मलापकर्षस्नानमात्रम्। **'प्रतिलोमा धर्महीना'** इति गौतमोक्तेस्त्वेषां विध्यनधिकारात्। यत्तु -

एकाहात् शुध्यते विप्रो योऽग्निवेदसमन्वितः।

त्र्यहात् केवलवेदज्ञो निर्गुणो दशभिर्दिनैः॥

तथा - **सम्पर्कविनिवृत्तानां न प्रेतं नैव सूतकम्।**

इति पराशरवाक्यं तत्कलीतरयुगविषयम्।

दशाह एव विप्रस्य सपिण्डमरणे सति।

कल्पान्तराणि कुर्वाणः कलौ स्यान्मोहकिल्विषम्॥

इति हारीतोक्तेः। तेन गुणतारतम्यादिनाप्यशौचसंकोचो न कलौ। मरणग्रहणं जन्मनोऽप्युपलक्षणं, विप्रग्रहणं क्षत्रादेरपि। पैठीनसिः-

सूतिकां पुत्रवतीं स्नातां विंशतिरात्रेण कर्म कारयेत्। गतेन मासेन स्त्रीजननी मिति।

पुत्रवतीं पुरुषजननीमित्यर्थः। मासोऽत्र सावनः। अशौचे तन्मासस्यैवोक्तत्वात्। तथा च शङ्खव्यासौ -

सूतकादिपरिच्छेदो दिनमासक्षपास्तथा।

मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तताः॥ इति।

ननु पुत्रकन्ययोर्यमलतया जनने तु मातुः केन शुद्धिरिति चेत्? अत्र केचित् यमलतया पुत्रकन्ययोर्जनने प्रथमतो यज्जन्म स्त्रीयाः पुंसो वा तज्जननेनैव मातुरशौचम्।

प्रथमतः तस्यैव प्रवृत्तत्वात्, द्वितीयस्य जन्मान्तरीयकत्वात् तदनुबन्धत्वेन पृथगशौचप्रयोजकत्वाभावात् द्वयोरप्येकसंप्रयोगजन्यशुक्रशोणितजन्यत्वे चैकत्वापत्तेरिति केचित्। तज्जन्यमेवेति। तन्मन्दमेवेति अस्मत्पितृचरणाः। तथा-

गुरुणा लघु बाध्येत लघुना नैव तद्गुरुः।

इति वक्ष्यमाणबृहन्मनुवचनेन लघुनः पुत्रजननाशौचस्य गुरुणा स्त्रीजननाशौचेन बाधात् मासेनैव मातुः शुद्धिः। ननु -

'न वर्द्धयेदघाहानि निमित्तविहितान्यपि'

इति वचनात् पुत्रजननाशौचस्य बलवत्त्वमिति। तदपि मन्दम्। लघुगुरुविचारस्य उच्छेदापत्तेः। 'न वर्द्धयेत्' इत्येतस्य तु अशौचस्य दशाहप्रभातश्रवणे त्रिदिनवृद्धिनिषेधपरत्वमिति वक्ष्यते। तथा च कन्यापुत्रयोर्यमलतया जनने स्त्रीजननेनैव मातुरशौचमिति सिद्धान्तः। २९।

योषित् मासावृतौ स्याच्छुचिरभिपवणात् स्पर्शने श्रौतकृत्ये
तुर्याहे पञ्चमाहे स्रवविरहवती चेद्दतौ स्मार्त्तकृत्ये।
षण्मासान् माससंख्यैरपि गतदिवसैः सर्वथोर्द्ध्वं ससूत्या-
शौचोऽथ सर्वसूतौ दशदिवसपरं श्रौतकृत्स्पर्शयोग्यम्॥ ३०॥

वशिष्ठः - **'त्रिरात्रे रजस्वला शुचिर्भवति'**।

त्रिरात्रे गते इति शेषः।

मनुः - **'रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला'** (५-६६)

साध्वी दैवपितृकर्मयोग्येत्यर्थः।

शङ्खः - **शुद्धा भर्त्तुश्चतुर्थेऽह्नि न शुद्धा दैवपित्र्ययोः।**
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति॥ (१६-१७)

भर्त्तुरपि पादसम्वाहनादिव्यापार एव शुद्धा, न स्मार्त्तकर्मणि। किन्तु श्रौतकर्मणि शुद्धा। तथा च कात्यायनसूत्रं **'पत्न्या उदक्याया दीक्षारूपाणि विहाय'** इत्युपक्रम्य **'त्रिरात्रान्ते गोमयमिश्रेण उदकेन स्नापयित्वा परिधानादि करोति'**

पञ्चमेऽहनि तु स्मार्त्तकर्मसु अभिगमने चाधिकारवतीति सिद्धम्। चतुर्थदिनरात्रौ अभिगमने चाधिकारो गुणरहितपुत्रोत्पत्तिरूपदोषसहिष्णोरिति पूर्वं लिखितम्। अत्र यद्यपि केचित्-

एकाकिन्यो विवाहादौ देशभङ्गेऽथवापदि।
उपोषणेन शुध्यन्ति सद्यो नार्यो रजस्वलाः॥

अत्रिः - रजस्वला यदा जाता पुनरेव रजस्वला।
अष्टादशदिनादर्वागशुचित्वं न विद्यते॥
एकोनविंशतेरर्वाक् एकाहं विंशतेर्द्व्यहम्।

इत्यत्रिवाक्यमवलम्ब्य व्यवस्थामाहुः।

यस्यास्तु नियमेनाष्टादशदिनमध्ये भूयो रजोदर्शनं तस्याः स्यादेव त्रिरात्राशौचमिति विज्ञानेश्वरा व्यवस्थापयामासुः। तथापि एकाकिस्त्र्यादीनामपि तथाचारो न दृश्यत इत्यस्माभिः तत्किंचिन्न निबद्धम्। यद्यपि स्मृत्यन्तरे वर्ण्णविशेषे त्वशौचविभिन्नत्वमुक्तं तथापि -

ऋतौ तु न पृथक् शौचं सर्ववर्ण्णेष्वयं विधिः।

इति मनूक्तेः। सर्ववर्ण्णस्त्रीसाधारणोऽयं विधिः। तृतीयमासमारभ्य षण्मासान्तं व्यवस्था। ब्राह्मे -

षण्मासाभ्यन्तरे यावद् गर्भस्रावो भवेद् यदि।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते॥
अत ऊर्द्ध्वं स्वजात्युक्तमशौचं तासु विद्यते।

तासु इति बहुवचनात् स्वजात्युक्तलिङ्गाच्च सर्ववर्ण्णस्त्रीसाधारणमिदम्। ऊर्द्ध्वमित्युक्तेः सप्तमादि समस्तमासेषु जातमृतौ मृतजनने च सर्वथा मातुः सूतकाशौचमेव। 'प्रजातायां दशरात्रादूर्द्ध्वम्' इति कात्यायनसूत्रात् सूतिकाया दशरात्रादूर्द्ध्वं श्रौतेऽधिकारः। यत्तु -

ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः ।
गतैः शूद्रा च संस्पृश्या त्रयोदशभिरेव च ।।

इति ब्राह्मवचनं शूद्रायाः त्रिंशद्दिनान्तरमेव कर्मार्हत्वं त्रयोदशदिनान्तरं संस्पृश्यत्वं तदनूढाविषयम् । शूद्राणां मासाशौचाभिप्रायं वा ।

दशाहमेवाशौचं तु सर्वेषामपरे विदुः ।

इति दशरात्राशौचपक्षस्य अस्मद्देशे सर्ववर्ण्णानामादृतत्वात् ।

'सूतिका सर्ववर्ण्णानां दशाहेन विशुध्यति ।'

इति वचनान्तरेण सर्ववर्णस्त्रीणामपि दशरात्रात्परं स्पर्शयोग्यत्वमेव ।। ३०।।

स्रावः स्यात्तूर्यमासावधिरथ कथितः पात आषष्ठमासं
सद्यः शौचं कुले स्यात्प्लवनमिह पितुः स्यादथापप्रसूतिः ।
षष्ठोद्ध्र्वे मासयुग्मे सपितृकुलभुवां जातमृत्यां मृतस्यो-
त्पत्तौ तिस्रो निशाः स्युः श्वसिति यदि शिशुः पूर्णमत्राप्यशौचम् ।। ३१ ।।

स्मृतिः - आचतुर्थाद् भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अपप्रसवसंज्ञा स्यात् सप्तमाष्टममासयोः ।।

स्रावपातयोः सपिण्डानां सद्यः शौचम् । षण्मासाभ्यन्तरमिति ब्राह्मवाक्यशेषे-

सद्यःशौचं सपिण्डानां गर्भस्य पतने सति ।

इत्युक्तेः । गर्भस्रावे पितुः स्नानमात्रम् । 'सप्तमाष्टममासयोस्तु जातमृते मृतजाते वा कुलस्य त्रिरात्र' मिति हारीतोक्तौ जातशब्दलिङ्गात् सपिण्डानां त्रिरात्राशौचमेव । पितुरप्यनयोर्मासयोः त्र्यहाशौचम् ।

जीवन् जातो यदि प्रेयान् मृतो वा यदि जायते ।
सूतकं मातुरेव स्यात् पित्रादीनां त्रिरात्रकम् ।।

इति बृहन्मनुवचनात् । हारीतोक्तकुलशब्दस्य पित्रादिपरत्वेन व्याख्यानाच्च पितुरप्यनयोर्मासयोस्त्र्यहाशौचं पूर्वश्लोके लिखितम् । सप्तमाष्टममासयोरपि बालजीवने सपिण्डानां समानोदकानां यथायोग्यं संपूर्णाशौचमुत्सर्गसिद्धमेव ।। ३१ ।।

सर्वेषां प्रेतजाते भवति हि नवमाद्येषु मासेषु पूर्णं
जातप्रेते तु वपुर्जनुरवधिदशाहाघमङ्गाशुचित्वं।
ज्ञातीनां नाघमात्रं यदि तु शिशुमृतिः सूतिमध्येऽपि नाडी-
च्छेदोर्द्ध्वं तत्र जाते जनुरवधिदशाहाघमन्येषु नाघम्॥ ३२॥

नवमादिमासे मृतजाते पारस्करः -

गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत्।

नवमादिमासे जातमृते तु कौर्मे - (उत्त. २३/१३-१४)

जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः।
मातुश्च सूतकं तत् स्यात् पिता त्वस्पृश्य एव च॥
सद्यः शौचं सपिण्डानां कर्त्तव्यं सोदरस्य च।

तत्सूतकं जननाशौचमित्यर्थः। तथा चात्र पित्रोर्जननावधि दशरात्रम्। सपिण्डानां सद्य इति वचनात् पितुरप्यङ्गाशौचं दशाहान्तम्, इत्यस्मद्देशे व्यवस्था सुस्थिरा। अन्यप्रकारा व्यवस्था यथा बृहत्प्रचेताः -

मुहूर्त्तं जीवितो बालो यदि पञ्चत्वमृच्छति।
मातुः शुद्धिर्दशाहेन सद्यः शौचास्तु गोत्रिणः॥

मुहूर्त्तं नाडीच्छेदोपलक्षणम्। यथा व्यवस्थान्तरम्। नाडीच्छेदात् पूर्वं बालमरणे पुनर्हारीतः 'जाते मृते मृते जाते पुनर्वा दशाहं सपिण्डानाम्'।

इदं नवमदशमादिमासविषयम्। पूर्वहारीतवचनस्य सप्तमाष्टममासयोः त्र्यहाशौचविषयत्वेन व्याख्यानात्।

दशाहाभ्यन्तरे बाले प्रस्थिते तस्य बान्धवैः।
शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते॥

इति बृहन्मनुवचनाच्च सपिण्डानां दशाहमेव। जातमात्रस्येति कौर्मवचनात् नाडीच्छेदात् पूर्वमपि सद्यः शौचमिति व्यवस्था अस्मद्देशे नाद्रियते। धर्मसन्देहे

'स्वस्य च प्रियमात्मन' इति याज्ञवल्क्येन (१-७) आत्मतुष्टेर्द्धर्मप्रामाण्यस्य सिद्धान्तितत्वात्। **'यस्मिन् देशे य आचार'** इति मनूक्तेश्च (२-१८)।

यच्च विज्ञानेश्वरैः पञ्चमषष्ठमासयोर्गर्भपाते कुलस्य त्रिरात्रं, सप्तमादिषु जातमृते मृतजाते वा दशरात्रं, दशरात्रान्तर्बालमरणेऽपि कुलस्य सूतकाशौचं स्मृत्यन्तरसम्बादेन व्यवस्थापितम्। तदपि नास्मद्देशे आद्रियते। अथ **'प्रकृतं जातमात्रस्य'** इत्यादि वचनात् सर्वत्र जातशब्दानां जातमात्रपरत्वम्। तथा च नाडीच्छेदनोत्तरं दशाहमध्ये बालमरणे मातापित्रोरित्यनुवृत्तौ पारस्करः (३-१०-६) -

'अन्तः सूतके चेदुत्थानादाशौचं सूतकवदिति'।

अस्यार्थः। आ उत्थानादिति पदद्वयम्। तथा च पित्रोर्जननावधिं दशरात्रावसानपर्य्यन्तमशौचमित्यर्थः। ज्ञातिविषये तु शंखः -

बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति।
सद्यः शौचं सपिण्डानां न प्रैतं नैव सूतकम्॥

कात्यायनोऽपि -

अनिवृत्ते दशाहे तु पञ्चत्वं यदि गच्छति।
सद्य एव विशुद्धिः स्यान्न प्रेतं नैव सूतकम्॥ ३२॥
एकः प्रेतः परश्चेच्छ्वसिति यमजयोस्तद्वदेकोऽत्रजात
प्रेतोऽन्यः प्रेतजातस्तदिह जनिमनादृत्य मृत्योर्बलित्वात्।
सद्यःशौचाः सपिण्डा जनुरवधि दशाहं पिताङ्गाशुचिः स्यात्
सद्यःशौचे तु शिष्टा विदधति सकले स्नानमात्रं न चान्यत्॥ ३३॥

यमलजननेऽप्येकस्य जीवने अन्यस्य मृतौ, तथैकस्य मृतजननेऽन्यस्य जातमृतौ च, जातमात्रस्य **'बालस्त्वन्तर्द्दशाहे तु'** इत्यादि वाक्येभ्यो जननापेक्षया मृतेर्बलीयस्त्वस्य वक्ष्यमाणत्वाच्च ज्ञातीनां सद्यः शौचम्। पित्रोर्दशरात्राशौचं च। मातुः संपूर्णाशौचमुक्तमेव। अस्मद्देशीयशिष्टाः **'द्विसन्ध्यं सद्य इत्याहुः'**

इत्युक्तिमनादृत्य सद्यः शौचे स्नानमात्रमाचरन्ति। 'सद्यःशौचे स्नानमात्रं पाकत्यागो न विद्यते' इत्यपि शिष्टाः ॥ ३३ ॥

पुत्रे पित्रोरदात् प्राङ्मृत उदितमहः तत्त्र्यहं तु व्रतात् प्राक्

ज्ञातेः सद्योऽहरेकं त्र्यहमुदितमधो दन्तचूडाव्रतेभ्यः ।

सर्वेषां पूर्णमूर्ध्वं त्वघमपि रदनक्षौरकर्म व्रतोक्तं

काले तेषामभावेऽप्यध उत भवने तत्तदुक्तं ह्यशौचम् ॥ ३४ ॥

एकादशाहादुत्तराशौचविचारः कौर्मे -

अजातदन्तमरणे पित्रोरेकाहमिष्यते ।

जातदन्ते त्रिरात्रं स्यादिति शास्त्रविनिश्चयः ॥

सपिण्डानां तु शंखः - 'प्राङ्नामकरणात् सद्यः' ।

याज्ञवल्क्यः- आदन्तजन्मनः सद्यः आचूडा नैशिकी स्मृता ।

त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥ (३-२३)

अत्र दन्तजननादयः कालोपलक्षका इति कल्पतरुकारादयः । तथा च दन्तजन्मकाले दन्तानुत्पत्तावपि बालमृतावहरशौचम् । एवं चूडाकाले चूडाया अभावेऽपि त्रिरात्रम् । अत एव अङ्गिराः -

यद्यप्यकृतचूडोऽपि जातदन्तश्च संस्थितः ।

दाहयित्वा तथाप्येनमशौचं त्र्यहमाचरेत् ॥ इति ।

एवमुपनयनकाले उपनयनाभावेऽपि सम्पूर्णाशौचमेव । तथा च ब्राह्मे -

अनुपनीतो विप्रस्तु राजा चैवाधनुर्द्धरः ।

अगृहीतप्रतोदस्तु वैश्य शूद्रस्त्ववस्त्रधृक् ॥

म्रियते यत्र तत्र स्यादशौचं त्र्यहेमव च ।

द्विजन्मनामयं कालस्त्रयाणां च षडाब्दिकः ।

पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतः परम् ॥

अत्र हि गर्भाष्टमवर्षे ब्राह्मणादित्रयाणामुपनयनधनुर्ग्रहणप्रतोदग्रहणकालः । शूद्रस्य षष्ठेऽब्दे वस्त्रग्रहणकालः । ततः पूर्वं बालमृतौ त्रिरात्रम् । तदूर्ध्वं बालमृतौ सम्पूर्णाशौचं भवति । एवं चोपनयनस्य कालोपलक्षकत्वमुक्तम् । एवं दन्तजन्मादिषु वोध्यम् । यत्तु -

'चतुर्थे पञ्चमे मासे दन्तजन्म सुदृश्यते ।'

चूडोपनयनयोरपि निमित्तान्तरेण स्वकालात पूर्वं करणम् । ब्रह्मवर्चसकामस्य पञ्चमेऽब्दे उपनयनम् एवं चूडायामपि प्रथमाब्दे । प्रथमेऽब्दे चूडाकरणं तत्र दन्तजन्माद्युक्ताशौचमेव । तथा च जावालिः -

व्रतचूडाद्विजानां तु प्रतीतिषु यथाक्रमं ।

दशाहस्त्र्यह एकाहः शुध्यन्त्यपि हि निर्गुणाः ॥

द्विजानां (दन्तानां) अत्र प्रतिपदोपादानादकालेऽपि तद्दर्शने यथोक्ताशौचम् । अन्यथा व्रतचूडादिकेष्वित्युक्तं स्यात् ॥ ३४ ॥

पित्रोः पुत्रीमृतावारदनमहरतः सर्वदोर्द्ध्वं त्र्यहं स्यात्

भ्रातुःस्नानं तथाहस्त्र्यहमपि रदनात् क्षौरतः प्राक् विवाहात् ।

ज्ञातेः सद्यः क्षुरात् प्रागहरुपरि च वाग्दानकाले त्र्यहं स्यात्

वाग्दानेऽनुष्ठिते तु त्र्यहमुभयकुले चेद् विवाहो न पित्र्ये ॥ ३५ ॥

कन्याशौचे कौर्मे -

अजातदन्तमरणे पित्रोरेकाहमुच्यते ।

दन्तजन्मोर्द्ध्वं स्मृत्यन्तरे-

अप्रत्तासु च प्रत्तासु संस्कृतासंस्कृतासु च ।

मातापित्रोः त्रिरात्रं स्यादितरेषां यथाविधि ॥

कन्यामरणाधिकारे पुनः कौर्मे - (उत्त. २३-१२)

आदन्तात् सोदरे सद्य आ चूडादेकरात्रकं ।

आप्रदानात् त्रिरात्रं स्यादिति शास्त्रविनिश्चयः ॥

सपिण्डानां तु ब्राह्मे -

आ जन्मनस्तु चूडान्तं सद्यः शौचं विधीयते ।
ततो वाक्दानपर्य्यन्तं यावदेकाहमेव च ॥
अतःपरं प्रवृद्धानां त्रिरात्रमिति निश्चयः ।
वाक्दाने तु कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् ॥
पितुर्वरस्य च ततो दत्तानां भर्त्तुरेव च ।
स्वजात्युक्तमशौचं स्यात् सूतके मृतके तथा ॥

अस्यार्थः। चूडानन्तरं वाक्दानकर्मानुष्ठानपर्य्यन्तं सपिण्डानामेकाहम्।

अत्र निबन्धकाराः - वाग्दानोत्कर्षे वाग्दानात् पूर्वं तत्कालेऽपि त्रिरात्रमित्यर्थः। तस्यायमर्थः - वाग्दानकर्मणो यथोक्तकाले कृत्वा पश्चात्करणे प्रसक्तेः वाग्दानकर्मणः पूर्वमपि वाग्दानकाले प्राप्ते त्रिरात्रमिति। तथा च वाग्दानकालप्राप्ते वाग्दानकर्मणोऽकरणेऽपि त्रिरात्रमेव पितृज्ञातीनामिति वाक्यार्थः स्फुटमेव। तथा च मनुः - (५-७२)

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः ।

असंस्कृतानाम् अविवाहितानाम्। तथा च विष्णुः - (२२-३२)

स्त्रीणां विवाहः संस्कारः ।
'त्र्यहाच्छुध्यन्ति बान्धवाः' इत्यनुवृत्तौ

शङ्खोऽपि **'अनूढानां तु कन्यानाम्'** इति।

वाग्दानकर्मण्यनुष्ठिते तु विवाहपर्यन्तं पितृकुले भाविभर्त्तृकुले च त्र्यहम्। पितुर्वरस्य चेति पूर्वेणान्वयः। उभयत इत्युक्तौ पितुर्वरस्य चेत्युक्तिः स्पष्टार्था। विवाहानन्तरं भर्त्तृकुल एवाशौचं, न पितृकुले। बृहस्पतिः -

पाणिग्रहणिका मन्त्राः पितृगोत्रापहारकाः ।
भर्त्तृगोत्रेण नारीणां देयं पिण्डोदकं ततः ॥

एवं सप्तपदीकरणानन्तरं -

नोदकेन न वाचा वा कन्याया पतिरुच्यते ।

पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे ॥

इति यमोक्तेः । तत्पूर्वं त्रिरात्रमुभयत्र । यद्यप्यादिपुराणे -

सापिण्ड्यं स्यात्तु कन्यानामदत्तानां त्रिपुरुषम् ।

इत्युक्तम् । तथापि मन्वर्थविरोधात् तत्रानादरसमाचारः । ततो दत्तानामिति कौर्मवाक्यात् पितृकुले सप्तपद्यनन्तरं नाशौचमित्यर्थः । केवलं तदुत्तरमपि पित्रोः त्र्यहं वक्ष्यते ॥ ३५ ॥

षष्ठो मासो रदेषु क्षुरकरण इहाब्दस्तृतीयोऽब्दषट्कात्

मासद्वन्द्वाधिकात् स्यात् परमुपनयने वाक्प्रदाने च कालः ।

अब्देऽतीते द्वितीये दहनमथ पुनः शूद्रजातेरशौचे

भेदोऽयं षष्ठवर्षः परिणयसमयः तत् समारभ्य पूर्णम् ॥ ३६ ॥

ब्राह्मे - अजातदन्तो वा मासैर्मृतः षड्भिर्गतो बहिः ।

इति षष्ठमासस्य दन्तजन्मकालत्वम् । 'दन्त जन्म सप्तमे मासि' इति रुद्रधरलिखनं तु बहुनिबन्धविरोधात् सर्वथा नादेयम् ।

मनुः - चूडाकर्म विशेषात्तु सर्वेषामेव धर्मतः ।

प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ॥ इति । (२-१४)

तत्र 'चूडाकार्या यथाकुलम्' इति याज्ञवल्क्योक्ते (१-१२) रस्मद् देशे तु तृतीयवर्ष एव चूडाकाल इति सिद्धान्तितम् । यद्यपि-

गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनं ।

राज्ञामेकादशे त्वेके विशामेके यथाकुलम् ॥

इति याज्ञवल्क्य (१-१४) विश्वामित्रौ । तथापि अशौचाधिकारे -

द्विजन्मनामयं कालस्त्रयाणां च षडाब्दिकः ।

पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतः परम् ॥

इति ब्राह्मोक्तौ त्रैवर्णिकदशाहाशौचपक्षाश्रयणेन द्विमासाधिकवर्ष-षट्कानन्तरमुपनयनकाल इति सिद्धम्। वाग्दानकालविषये शुद्धिगुत्सकारैः -

अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी।

दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥

गौरीं वा वरेयत्कन्यां नीलं वा वृषमुत्सृजेत्।

त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरम्॥

इत्यादिवाक्यैः वाग्दानं प्रत्यष्टवर्षस्य मुख्यकालत्वावगम इत्युक्तम्। पञ्चाननस्तु - वाग्दानकालस्य मुनिभिरनुक्तत्वात् उपनयनकालस्य वाक्प्रदानकालत्वेन प्रमाणसम्भव इत्यादि। वस्तुतस्तु द्विमासाधिकषड्वर्षानन्तरं विवाहकाल इति विवाहप्रस्तावे प्रमाणसिद्धम्।

यत्तु शुद्धिगुत्सकृता उक्तं, तन्न रुचिरम्। '**त्र्यष्टवर्षोऽष्टवर्षां वा**' इत्यस्य गर्भाष्टमपरत्वम्। '**अष्टवर्षा भवेद् गौरी**' इति वाक्यं तु कन्याया गौरीत्वप्रतिपादकं, न तु विवाहकालप्रतिपादकम्। गौरीं वेति वाक्ये फलातिशय उक्तो, न तु विवाहकाल इति व्याख्यानात्। तथा च शतानन्दः -

'गर्भाष्टमवर्षे तु दशमैकादशे तथा' इति।

'कन्यापरिणयः शस्त' इति वात्स्यादिसम्मतम्। गर्भादिति सर्वत्रान्वयः।

अन्यथा जन्मावधि द्वादशाब्दे विवाहनिन्द्योक्तिरनर्थिका स्यात्।

संवर्त्तः - **विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः।**

काश्यपः - **सप्तवर्षा भवेद् गौरी दशवर्षा तु कन्यका।**

प्राप्ते तु द्वादशवर्षे कुमारीत्यभिधीयते॥

भविष्ये - **सप्तवर्षा भवेद् गौरी दशवर्षा च नग्निका।**

स्त्रीपुंसयोस्तु सम्बन्धकरणं प्राक्विधीयते।

इति नारदोक्तेः वाग्दानस्य विवाहप्राक्कालीनत्वसिद्धेः। सुतरां मासद्वयाधिककवर्षषट्कानन्तरं वाक्प्रदानस्य काल इति सिद्धम्।

अथ बालमरणे दाहकालविचारः

द्विवर्षमध्ये बालमरणे निखननम्। याज्ञवल्क्यः - (३-१)

ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकं ततः।

मानवीये तु - (५/६८-३९)

ऊनद्विवर्षकं प्रेतं निर्दग्धुर्बान्धवा बहिः।
नास्य कार्य्योऽस्थिसंस्कारो नास्य कार्योदकक्रिया॥
अरण्ये काष्ठवत् त्यक्त्वा क्षिपेयुस्त्र्यहमेव हि॥ इति।

'अरण्ये काष्ठवत्त्यक्त्वा' इत्यनेन दृष्टान्तेनापूर्णद्विवर्षं भूमौ निधाय औद्ध्र्वदैहिकेषु उदासीनैर्भवितव्यमिति विज्ञानेश्वरादयः। त्र्यहाशौचोक्तिस्तु सम्वत्सरे चूडाभिप्राया इति।

यद्यप्यकृतचूडोऽपि जातदन्तश्च संस्थितः।
दाहयित्वा तथाप्येनमशौचं त्र्यहमाचरेत्॥

इत्यङ्गिरोवाक्यं वर्षत्रयोद्ध्र्वं चौलोत्कर्षे ज्ञेयमिति च। एवं च **'ऊनद्विवर्षस्य दाहक्षेपौ पाक्षिकौ'** इति केषांचिल्लिखनं न सम्यगित्यवधेयम्। **'अद्विवर्षे मातापित्रोरेकरात्रं त्रिरात्रं वा शरीरमदग्ध्वा निखनति'** इति पारस्करसूत्रे (३-१०) त्वजातदन्ते एकरात्रं, जातदन्ते त्रिरात्रमिति। 'वा' शब्दो व्यवस्थावाची। तथा च तृतीयादिवर्षे मरणे चूडायां कृतायामकृतायामपि दाह एवेति सिद्धम्। शूद्राणां सर्वत्राशौचे ब्राह्मणसाम्येऽपि षष्ठवर्षस्य विवाहकालत्वं, तदवधि पूर्णाशौचं च इत्येव भेदः। तत्र प्रमाणवाक्यं प्राग् लिखितम्॥ ३६॥

सूतौ सूतिः समा चेत् मृतिरपि मृतके पूर्वजाशौचशेषा-
हैः शुद्धिर्दीर्घमाद्यं परमपि लघुनो बाधकं स्यात् सदृक् चेत्।
दीर्घं चाल्पं पुरोजं परमपि मृतकं शोधकं सूतकस्य
त्यक्तोदक्यां क्रियाकृत् मृतपतिवनितासूतिकाः पुत्रवध्वौ॥ ३७॥

समानजातीयाशौचसन्निपाते विष्णुः (२२/३५-३७) -

'जननाशौचमध्ये यद्यपरं जननं स्यात्, पूर्वाशौचव्यपगमे शुद्धिः ।

रात्रिशेषे द्वाभ्यां प्रभाते दिनत्रयेण । अशौचमध्ये ज्ञातिमरणेऽप्येवमेव' ।

तथा च ज्ञातिमरणमध्ये मृतकान्तरेऽपि पूर्वशेषेण शुद्धिः । रात्रिः शेषो अवशिष्टो यत्रेति व्युत्पत्त्या रात्रिशेषपदमन्त्याहोरात्रपरम्' इति पञ्चाननः । तस्मिन् द्वाभ्यां प्रभाते दशाहक़ल्पे दिनत्रयेण इत्यर्थः । तथा च शङ्खः - **'अथ चेदन्तरा प्रमीयेत जायेत वा अवशिष्टैरेव दिवसैः शुध्येदहःशेषे द्वाभ्यां, प्रभाते त्रिभिः'** इति । तथा च दशमेऽहनि तदुषसि च सजातीयनिमित्ताशौचश्रवणे द्वित्रिदिनवृद्ध्या शुद्धिर्यद्यपि स्मृतिषु विहिता । तथापि **'न वर्द्धयेदघाहानि'** इति मनुना (५-८४) निषिद्धा । तथा च विहितप्रतिषेधाद् विकल्पः । तदुक्तं भट्टैः-

अथवान्तर्यदाशौचनिमित्तं किंचिदापतेत् ।

तच्छेषेण विशुद्धिः स्यात्तच्छेषोऽयं भविष्यति ॥

न वर्द्धयेदघाहानि निमित्तापगतान्यपि ।

विकल्पे सति यथादेशाचारं व्यवस्था । इत्यस्मद्देशे दशमाह-तत्प्रभात-प्रयुक्तद्वित्रिदिनवृद्धिर्नाद्रियते । तथा देवलः -

परतः परतः शुद्धिरघवृद्धौ विधीयते ।

स्याच्चेत् पञ्चतमादह्नः पूर्वेणाप्यनुशिष्यते ॥

अस्यार्थः । पञ्चतमादह्नः परतः पञ्चमदिवसानन्तरं सजातीयाशौचवृद्धौ सत्यां परतः परेणाशौचेन शुद्धिः । पञ्चमदिवसात् पूर्वं सजातीयाशौचवृद्धौ पूर्वेणाौचेन शुद्धिर्विधीयत इति । तथा च पूर्वेणेत्येतत्पदमादृत्य व्याख्येयमिति । **'न वर्द्धयेदघाहानि'** इत्यनेन निषिद्धत्वाद् वैकल्पिकानि यथादेशान्तरं व्यवस्थितानीति नास्मद्देशे विचार्यते ।

अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् - (म.स्मृ. ५-७३)

इत्यादि मन्वाद्युक्तमपि अस्मद्देशे समाचाराभावात् न व्यवस्थाप्यते। अत एव विज्ञानेश्वरैर्नानादिवसशोधकवाक्यान्युदाहृत्य 'समाचाराभावान्न व्यवस्थाप्यते' इत्युक्तम्। अन्तरङ्गगुणवद्भावेन शुद्धिविचारो न कलावस्तीत्यप्याहुः। अथ सजातीयविषये उशनाः -

स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि।

न च पूर्वेण शुद्धिः स्यात् स्वकालेनैव शुध्यति॥

बृहन्मनुरपि - **गुरुणा लघु बाध्येत लघुना नैव तद्गुरुः।** इति।

अतएव अल्पकालीनमरणाशौचस्य दीर्घकालीनसूतकं बाधकमिति हारलताकृता यदुक्तं तन्नादेयमेव। तयोर्विजातीयत्वात् मृतेर्बलीयस्त्वाच्च।

अङ्गिराः- **अनिर्दशाहे मरणे पश्चात् स्यान्मरणं यदि।**

प्रेतमुद्दिश्य कर्त्तव्यं तत्राशौचं स्वबन्धुभिः॥

देवलः - **मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्॥**

षट्त्रिंशन्मते -

शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी।

वृद्धात्रिः- **सूतकाद् द्विगुणं शावं शावाद् द्विगुणमार्त्तवं।**

आर्त्तवाद् द्विगुणा सूतिस्ततोऽधिशवदाहकः॥

शवदाहको दाहादिप्रेतकर्मकर्त्ता पुत्रादन्योऽपीत्यर्थः। पूर्वस्मादुत्तरोत्तरमशौचं बलवदित्यर्थः। ततोऽपीति पाठे सूतितोऽपीत्यर्थः।

बृहन्मनुः - **शावस्योपरि शावे तु सूतकोपरि सूतके।**

शेषाहोभिर्भवेच्छुद्धिरुदक्यां सूतिकां विना॥

श्रीरामायणे सीतां प्रत्यनसूयावाक्यं -

नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियः।

पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव सः॥

तथा च क्रियाकर्त्तारं सूतिकां म्रियमाणपतिकां रजस्वलां च त्यक्त्वा अन्येषां पूर्वाशौचेन शुद्धिः। पुत्रं प्रति पित्रशौचस्य बलवत्त्वेन वक्ष्यमाणत्वात् तस्य क्रियाकर्त्तृत्वेऽपि पितृमरणेनैव शुद्धिः। तत्समानधर्मत्वात् तद्भार्याया अपि। तथा च ततपुत्रवध्वोरपि पूर्वाशौचशेषेण शुद्धिरिति स्थूणानिखननन्यायेन उक्तम्॥ ३७॥

पित्रोर्मृत्युं दशाहात् परमपि शृणुयाद्दूरगोऽप्यात्मजश्चेत्
स्नात्वोपोष्यार्द्रवासस्तदवधि च दशाहान्यशौची नियम्य।
नित्यं स्नात्वाम्बु दद्यादथ न यदि कृतं प्रेतपिण्डाद्यतीतेऽ-
प्यब्दे कुर्यादशौचे स्थितवति विदिते शेषघस्रैर्विशुध्येत्॥ ३८॥
पित्रोराशौचमाद्यं परमपि सकलाशौचसंशोधकं स्यात्,
तत्रादौ मातृमृत्यां पितुरुपरितने नाप्यशौचेन शुद्धिः।
तातस्यैकादशाहे भवति तदुभयोः सर्वमेकादशाहो -
थोक्तं कर्माथो तयोः स्वमृततिथिदिनाद्येव कर्मापरं स्यात्॥ ३९॥
माता ताताब्दमध्ये यदि भवति मृता तत्समाप्य दशाहा -
न्तं सर्वं कर्मवप्तुर्दशदिनपरतः पक्षिणीं वर्द्धयित्वा।
तत्राद्ये त्रीन् द्वितीयेऽहनि च वितनुयात् सप्तपिण्डानथास्याः
पित्रोरेकादशाहोदितविधिमपराहे परं स्वस्वमृत्योः॥ ४०॥
मध्येऽब्दं चेद्विमातुर्मरणनिशमनं मज्जनं चोपवासः,
पुत्रस्य स्यादशौचं दशदिवसमतीते तु वर्षे त्रिरात्रं।
पक्षिण्यन्तर्निशैकाभिहितोभयदिने चाहरुक्तिं त्रिसन्ध्यं
यावत्सूर्योदयं यन्निशिमृतकरजः सूतयोऽहस्तदेकम्॥ ४१॥

पित्राद्यशौचे विशेषः। पैठीनसिः -

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः।
श्रुत्वा तद्दिनमारभ्य दशाहं मृतकी भवेत्॥

आग्नेये- पितृमात्रोपघाते तु आर्द्रवासा ह्युपोषितः ।
अतीतेऽब्दे प्रकुर्वीत प्रेतकार्यं यथाविधि ॥ (१५८-४३)

अतः पुत्रः पित्रोर्दशाहोत्तरमरणश्रवणे स्नात्वोदकं कृत्वार्द्रवासाः तदवधि दशाहोक्तनियमान् कृत्वा नित्यं स्नानोदके च कृत्वा दशाहमशौचमाचरेत् । वर्षोत्तरमपि मरणश्रवणे तथैव सर्वं कुर्यात् । केनचित् क्रियायामकृतायां तु सर्वं पिण्डादिकं कर्मापि कुर्यात् । दशाहमध्ये श्रवणे तु **"प्रोषितश्चेत् प्रेयाच्छ्रवण-प्रभृतिकृतोदकाः कालशेषमासीरन्निति"** सर्वसाधारण्येन पारस्करोक्तेः (३/१०/४३) । केनचित् क्रियायामारब्धायामपि सर्वनियमवान् शेषदिनैःशुध्येत् । क्रियायामनारब्धायां तु शेषदिनैः सर्वं प्रेतकृत्यं कृत्वा शुध्येत् ।

दशाहोक्तनियमाः यथा याज्ञवल्क्येन (३.१६)

क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षितौ ।
पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ॥

वसिष्ठः - **'गृहात् प्रव्रजित्वाऽधप्रस्तरे त्र्यहमनश्नन्तमासीरन् ।**
क्रीतोत्पन्नेन वर्त्तेरन् ।'

अधप्रस्तरोऽशौचिनां शयनासनार्थस्तृणमयः प्रस्तरः । अतः क्षितिशयनविधिः खट्वादिनिषेधपरः ।

मनुः - **अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् ।**
मांसादिकं च नाश्नीयुः शयीरंश्च पृथक्क्षितौ ॥ (४-११०)

गौतमः (५.३५) - **'अधःशय्यासनिनो ब्रह्मचारिणश्च सर्वे'** इत्यादयः । अत्र यद्यपि विज्ञानेश्वरैः पिण्डदानमात्रमधिकं पुत्रस्यैवान्ये नियमाः सर्वेषामशौचिनामपीति लिखितम् । तथापि अस्मद्देशे पुत्रा एव नियमान् कुर्वन्ति । अन्ये अशौचिनस्तु स्नानोदकदानमांसाशनपरान्नानशनान्येव समाचरन्ति । युक्तं चैतत् ।

तैलाभ्यङ्गो बान्धवानामंगसंवाहनं तु यत् ।
तेन चाप्यायते जन्तुर्यच्चाश्नन्ति स्वबान्धवाः ॥

इति मार्कण्डेयपुराणोक्त-ब्रह्मचारिधर्मविरुद्ध-तैलाभ्यङ्गादिकं निम्बपत्रादि अननुष्ठेयं प्रसज्येत इति ।

एवं पित्रोर्देशान्तरमरणे वर्षेऽतीतेऽपि दशाहाद्यशौचविधानाद् अक्षारलवणान्नाशनादिस्मृतेश्च वक्ष्यमाणनानानियमविधेश्च सर्वाशौचापेक्षया पित्रशौचं गुरुतममेव । तस्मात् तदशौचं पूर्वं परमपि सर्वाशौचसंशोधकमेव । अत्रापि विशेषः स्मृत्यन्तरे -

मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।

पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम् ॥

इति मातरि मृतायां पश्चात्पितृमरणे उत्तरभाविनापि पितृमरणेन एव शुद्धिः । द्वयोरेकादशाहकृत्यं पितुरेकादशाहदिने कार्यम् । ''पितृमरणाशौचमध्ये पश्चान्मातृमरणे तु पितुरशौचं समाप्य पश्चात् पक्षिणीं प्रक्षिप्य शुद्धिः, न पूर्वशेषमात्रेण । दशाहानन्तरं पक्षिणीं समाप्य द्वयोरेकादशाहकृत्यं कार्यम्'' इति विज्ञानेश्वराः ।

एतदन्येऽप्यस्मद्देशीया निबन्धकृतः संमेनिरे । अत्र यत् केचित् -

''पूर्वं वा परतोऽथ चैवमनयोर्मातुः पिता शोधकः'' (शु.च.श्लो.१६)

इति कारिकां निबध्य पितृवियोगमध्ये यत्र कुत्रापि दिने मातृवियोगे चोभयथापि पितृवियोगदिनमारभ्य दशाहोरात्रैः शुद्धिः । तथा च महाभारते- **माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ।** (१.६९.२९)

भस्त्रा (चर्मपुटिका) । एतेन पितृपुत्रयोरेकात्मत्वप्रदर्शनेन मातुरपेक्षया पितुरेव परमान्तरङ्गत्वं सूचितमिति युक्तिमूचुः । तन्न रुचिरम् ।

''मातुः कुर्यात्तु पक्षिणीम्'' इति वाचनिकेऽर्थे न्यायावतारस्यानुचितत्वात् युक्तिविरुद्धत्वाच्च । तथा च माता भस्त्रा इति नाशौचप्रकरणेऽभिहितम् । तथापि पितुराधिक्योक्तिर्यद्यप्यशौचप्रयोजिका च स्यात् । श्रीरामायणे स्मृतौ च **''उपाध्यायाद्दशाचार्य''** इत्याद्युक्त्वा

गर्भधारणपोषाभ्यामेभ्यो माता गरीयसी ।

इत्यादिना ।

उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥

इति मानव (२,१४५) भविष्यपुराणवाक्येन च वन्दनादौ मातुराधिक्यदर्शनेन च मात्रशौचं किमिति वलवत्तरं न स्यात् ?

किंच "अन्तरङ्गभावेन शुद्धिविचारो न कलौ" इत्युक्तम् ।

किं च पितृदशमेऽहनि पितृकर्मसमाप्तौ स्वल्पावशिष्टायामेव मातृमरणे मातुर्दशदिनविहितकर्मणां स्वल्पकाले कर्तुमशक्यत्वेन पक्षिणीप्रक्षेपं विनाऽनिर्वाहात् पितृवियोगमध्ये मातृमरणे पक्षिणीप्रक्षेपो युक्ततमः । सर्वत्राप्यशौचपाते एकादशाहकर्मानुष्ठानस्य अशौचानन्तरदिने सिद्धान्तितत्वात् पक्षिण्यन्तरदिने द्वयोरप्येकादशाहकृत्यं कार्यमिति विज्ञानेश्वराभिप्रायः । मासिकादीनि तु स्वस्वमरणतिथ्यवध्येव कार्याणि । त्रैपक्षिकं स्वमरणदिनावध्येव ।

अत्र विमातुर्विशेषो दक्षेणोक्तः-

पितृपत्न्यामतीतायां मातृवर्जं द्विजोत्तमः ।
सम्वत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत् ॥

इति सम्वत्सरात् पूर्वं दशरात्रमित्यर्थः । विमातुर्मातृत्वसत्त्वात् श्रवणदिने स्नानोपवासावुत्सर्गसिद्धौ । अङ्गिराः -

द्विसन्ध्यं सद्य इत्याहुः त्रिसन्ध्यमहरुच्यते ।
एका रात्रिर्दिने द्वे च पक्षिणीत्यभिधीयते ॥

पक्षिण्यां यथा पिण्डव्यवस्था, सा पूर्वपद्ये निबद्धा । तत्र स्मृतिः -

प्रथमेऽह्नि त्रयः पिण्डा द्वितीयेऽह्नि चतुष्टयं ।
तृतीयेऽह्नि त्रयः पिण्डाः पक्षिण्यां प्रथमे त्रयम् ॥
द्वितीयेऽहनि सप्त स्युरिति खण्डाशुचौ विधिः ।

सद्यःशौचे स्नानमात्रसमाचारात् पद्येऽस्माभिर्न निबद्धम्। त्रिसन्ध्यमहरित्युक्तम्। तत्र रात्रौ सूतकादिपाते गणनं कथं स्यात् इत्यपेक्षायां जावालिः-

रात्रावेव समुत्पन्ने मृते रजसि सूतके।
पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः॥

इति चतुर्णां प्रमाणानि॥ ३८-४१॥

पत्नी पत्या सहाग्निं प्रविशति यदि वाशौचमध्येऽनुगच्छेत्
भेदेऽप्यत्रोभयत्रोभयमृतदिनयोः पत्यशौचेन शुद्धिः।
आशौचे चेदतीतेऽप्यनुगमनमिहाशौचमेव त्रिरात्रं
विप्रा नैवानुगच्छेत्तदितरवनिता अन्वयाः क्षत्रियाद्याः॥ ४२॥

व्याघ्रपादः - मृतं पतिमनुव्रज्य पत्नी चेज्ज्वलनं गता।
तत्रापि दाहस्तन्त्रेण पृथगस्थिक्रिया भवेत्॥
नवश्राद्धं सपिण्डान्तं समाप्यं स्यात् सकृद् द्वयोः।
अत्र मृत्यहभेदेऽपि नवश्राद्धादि यद्दिने।
भर्त्तुर्यत् क्रियते पत्न्या अपि तत्रैव तत्क्रिया॥

चतुर्थ्यादिश्राद्धं नवश्राद्धमिति पूर्वमुक्तम्। वैशम्पायनः -

एकचित्यां समारूढौ दम्पत्ती निधनं गतौ।
पृथक् पिण्डं च श्राद्धं च ओदनं न पृथक् पृथक्॥

एकपात्रे अन्नं पक्त्वा द्विधा विभज्य दद्यात् इत्यर्थः।

एकचित्यां समारूढौ म्रियते दम्पत्ती यदि।
तन्त्रेण श्रपणं कृत्वा पृथक् पिण्डं समापयेत्॥

इति वाक्यान्तरात्। अत्रापि पिण्डपदं पूर्ववाक्यात् श्राद्धोपलक्षणम्।

एकां चितिं समासाद्य भर्त्तारं याऽनुगच्छति।
तद्भर्त्तुर्यः क्रियाकर्त्ता स तस्याश्च क्रियां चरेत्॥

इत्यादिवाक्यैर्मरणदिनभेदेऽपि सपिण्डान्तकृत्यस्य पत्न्या सहोक्तौ पत्यशौचेन शुद्धिः कैमुतिकन्यायसिद्धा। पूर्वेद्युः स्वल्पावशिष्टायां रात्रौ भर्तृमृतौ परेद्युर्दाहारम्भे सहगमनेऽपि दिनभेदः सम्भवति।

एवमग्निप्रवेशं विना पत्न्या दाहाद्यन्मरणेऽप्यन्नमेकभाण्डे सम्पाद्य पृथक् दद्यात्।

एकाहे तिथिभेदे तु नवश्राद्धेषु तन्त्रता।
श्राद्धानि मासिकादीनि मृततिथ्योर्द्वयोः पृथक्॥

इति वाक्यात् सहगमनानुगमनयोरेकविधित्वात् दशाहमध्येऽनुगमने पत्यशौचेन शुद्धिः। दशाहोत्तरमनुगमने तु पुत्रादीनां त्रिरात्रमशौचम्।

अन्विताया: प्रदातव्या दशपिण्डास्त्र्यहेन तु।
स्वाम्यशौचे व्यतीते तु तस्याः श्राद्धं विधीयते॥

इति पैठीनस्युक्तेः। अन्विताया अनुगमनकर्त्र्याः पुनः पैठीनसिः -

मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्।
इतरेषां तु वर्णानां स्त्रीधर्मोऽयं परः स्मृतः॥
पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति।
अन्यासां चैव नारीणां स्त्रीधर्मोऽयं व्यवस्थितः॥ ४२॥
श्रौताग्नेः पर्णदाहो यदि भवति दशाहान्तरे वा तदूर्ध्वं
ज्ञातीनां चात्मजानां तदवधि तदघं सर्वथैव त्रिरात्रं।
पर्णो दाहो निरग्नेर्यदि भवति दशाहान्तरे शेषघस्रैः
शुद्धिः स्यान्न त्र्यहैः स्याद्, यदि भवति तदूर्ध्वं तदैव त्र्यहं स्यात्॥ ४३॥

छन्दोगपरिशिष्टे "अस्थ्नामलाभे" इति वाक्ये "ततः प्रभृति सूतकम्" इति यदुक्तं, तत् आहिताग्निविषयम्। एतत्तु -

यस्य तु त्रयमग्नीनां तस्योदूर्ध्वं दाहकर्मणः।

इत्यस्यैवानुवादः । यद्यपि ब्राह्मे आहिताग्नेरित्युपक्रम्य "अनाहिताग्नेर्देहस्तु" इत्युक्त्वा

एवं पर्ण्णनरं दग्ध्वा त्रिरामशुचिर्भवेत् ।

इति साग्निनिरग्निसाधारण्येन दाहावधि त्रिरात्रमशौचमुक्तम् । तथापि शौताग्नेर्दाहावध्येवाशौचमित्युक्तत्वाद् दशाहमध्येऽपि पर्ण्णदाहे तदुत्तराशौचस्य समानविषयत्वेन वाधकत्वम् । निरग्नेस्तु दशाहमध्ये पर्ण्णदाहे मरणज्ञानावधिकस्य अशौचस्य भिन्नविषयतया पर्ण्णदाहनिमित्ताशौचेन न वाधः । प्रत्युत दीर्घकालीनेन दशरात्राशौचेन अल्पकालीनस्य पर्ण्णदाहनिमित्तत्रिरात्राशौचस्य वाधः । ननु निरग्नेरल्पकालीनपर्ण्णदाहनिमित्तत्रिरात्राशौचं दशरात्राशौचस्य वाधकमस्त्विति चेन्न । तस्य दशाहोद्ध्र्वपतित-पर्ण्णदाह-सावकाशत्वेन भिन्नविषयतया बाधकत्वासम्भवात् ॥ ४३ ॥

साग्नेरेवास्थिदाहो भवति चयनिनः कालिदासा अबोचन्
तत्राशौचं त्र्यहं स्यादिति निगमविदोऽन्ये दशाहं ब्रूवन्ति ।
ऊढा पुत्री प्रसूते यदि पितृसदने तत्त्रिरात्रं तु पित्रोः
तस्यां मृत्यां तयोर्वा त्रिदिनमपि मृतौ यत्र कुत्रापि वासे ॥ ४४ ॥

विदेशस्थेत्यादि पूर्वोदाहृतकात्यायनोक्तौ "पात्रन्यासादि पूर्ववदि" त्युक्तत्वात् पात्रन्यासार्थमेव पुनर्दाहप्रवृत्तेः । साग्नेरेवास्थिदाहः त्रिरात्राशौचानुवृत्तौ कालिदासचयनिनः "दग्धेऽस्थिपर्ण्णे नरे" (शु,च,श्लो,२७) इति । "एवं पर्ण्णनरं दग्धेति" ब्राह्मे । पर्ण्णनरदाहे त्र्यहाशौचविधानात् तत्संनियोगशिष्टास्थिदाहे त्र्यहाशौचमेव इति व्याख्यांतम्, तदन्ये न सहन्ते । पर्ण्णदाहापेक्षया मुख्योऽस्थिदाहोक्तस्य त्रिरात्राशौचस्य कथमतिदेशः स्यादिति । तस्मादस्थिदाहे दशाहमेवाशौचम् । तथा च वशिष्ठः "आहिताग्निश्चेत् प्रवसन् म्रियते, पुनः संस्कारं कृत्वा शव इवाशौचम्" इति । तत्र पुनः संस्कारपदोपादानादस्थिदाह एव न पर्ण्णदाह इति । पर्ण्णदाहविचारः पूर्वमुक्तः ।

कौर्मे - दत्ता नारी पितृगृहे प्रधाने सूयतेऽथवा।

म्रियते वा तदा तस्याः पिता शुध्येत्त्रिभिर्दिनैः ॥

प्रधाने संसर्गे पितेति मातुरुपलक्षणम्। वशिष्ठः -

"प्रत्तानां तु स्त्रीणां त्रिरात्रमशौचं विज्ञायत इति।

पित्रोरिति शेषः। बृहस्पतिः -

शावाशौचं त्रिरात्रं स्यान्महागुरुनिपातने।

दुहितृणां तु विन्नानां सर्ववर्ण्णेष्वयं विधिः ॥

दुहितृपदसमभिव्याहारात्। महागुरू पितरौ। विन्नानां विवाहितानां। स्वगृह इत्युपादानाभावात् यत्र कुत्रापि स्थितौ तत्र दुहितृणां पित्रोश्च मृतावन्योन्यं त्र्यहम्। रदोत्पत्त्यनन्तरं यदा कदाचिद्दुहितृमरणे पित्रोः त्रिरात्राशौचस्यं उक्तत्वेऽपि पुनरुपादानं स्फुटत्वार्थम्। 'यत्र कुत्रापि' इत्यस्य प्राप्त्यर्थं च ॥ ४४ ॥

सन्न्यासी प्रैति चेत् तन्निशमयति सुतस्तद्दिने स्नानपूर्वं

नीरं दत्त्वैव सद्यः शुचिरथ यतिनोऽप्यातुरस्याभियुक्ताः।

मृत्यौ किंचित्तथेति ब्रुवत इह परे तन्निरस्यैव पूर्ण्णा

शौचं दाहादिकृत्यं परमितरगृहस्थाविशेषं वदन्ति ॥ ४५ ॥

"अग्निजलसंग्रामदेशान्तरस्थसंन्यासानशनमहध्वनिकानामुदकदानं कार्यम्" इति सुमन्तुवाक्यात्। "संन्यस्ते सद्यःशौचं विधीयते" इति ब्राह्मवाक्याच्च सन्न्यासिमृतौ पुत्रस्यापि तद्दिने उदकदानमात्रम्। श्रवणे सद्यः शौचमेव। अनुक्तोऽप्युपवासः कार्यः। यत्तु वक्ष्यमाणप्रचेतोवाक्ये जलदानस्य निषिद्धत्वं, तत् प्रथमदिनव्यतिरिक्तविषयम्। एवं आतुरसन्न्यासिमरणेऽपि सद्यः शौचमिति केचित्। वस्तुतस्तु सुमन्तूक्तौ सन्न्यासिपदोपादानेऽपि "सन्न्यस्ते सद्यः शौचं विधीयते" इति वाक्ये संन्यस्तपदे च निष्ठान्ते साङ्गप्रधानक्रियोपरमप्रतीतेर्दीक्षोपरमे साङ्गदीक्षाव्यापारोपरमप्रतीतिवत् सर्वेतिकर्त्तव्यतायुक्तस्य संन्यासस्यापवर्गे सन्न्यस्तत्वं दीक्षितत्ववदिति ॥

तदुक्तं पूर्वमीमांसायां पञ्चमाध्याये तृतीयपादे **"परेषां च दानाद् दीक्षितः स्यात् सर्वे दीक्षाभिसम्बन्धादिति"** प्रैषोच्चारणमात्रेण सन्न्यस्तत्वाभावात् सन्न्यस्ते सद्यःशौचमित्यस्यापवादस्याभावाद् दशाहाशौचमेव । एवं च सुमन्तूक्तौ सन्न्यासिपदं सन्न्यस्तपरम् । किं च आतुरसन्न्यासिनो दैवाज्जीवने -

अग्नीन् परिचरेत् सम्यक् न त्यजेद्दाहकारणात् ।

इति श्रीधरस्वामिवाक्यात् सर्वथैव मरणोत्तरसंस्कारा गृहस्थविशेषाः ॥ ४५ ॥

सद्यः शौचे हि वर्ण्णी वहुभिरभिमतश्चोपकुर्वाणको यः
कैश्चित् सोऽपि व्रतेऽस्मिन् गतवति गदितोऽशौचवान् वा त्रिरात्रं ।
पित्रोर्मृत्यां तु दाहादिकमखिलविधिं सोऽपि कुर्वीत किन्तु
प्रेतान्नं नैव खादेन्निजनियमयुतो ज्ञातिसम्पर्कहीनः ॥ ४६ ॥

छन्दोगपरिशिष्टे -

न त्यजेत् सूतके कर्म ब्रह्मचारी स्वकं क्वचित् ।
न दीक्षणात्परं यज्ञे न कृच्छ्रादि तपश्चरन् ॥
पितर्य्यपि मृते नैषां दोषो भवति कर्हिचित् ।
अशौचं कर्मणोऽन्ते स्यात् त्र्यहं वा ब्रह्मचारिणाम् ॥

स्वकं ब्रह्मचर्याश्रमविहितम् । मनुरपि (५-८८) -

आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कुर्यात् त्रिरात्रमशुचिर्भवेत् ॥

आदिष्टं व्रतमस्यास्तीति आदिष्टी ब्रह्मचारी । याज्ञवल्क्यः (३-१५)

आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती ।
सकटान्नं च नाश्नीयान्न च तैः सह सम्वसेत् ॥

अत्र विज्ञानेश्वराः- माता च पिता च पितरौ, एतन्निर्हृत्यापि व्रती ब्रह्मचारी व्रत्येव, न पुनरस्य व्रतभङ्गः । सकटशब्देन अशौचं लक्ष्यते कटसहितमन्नं सकटान्नं ब्रह्मचारी नाश्नीयात् न चाशौचिभिः सह सम्वसेत् । एवं वदता याज्ञवल्क्येन

आचार्यादिव्यतिरिक्तप्रेतनिर्हरणे ब्रह्मचारिणो व्रतभङ्ग इत्युक्तम् । अतएव वशिष्ठः "ब्रह्मचारिणः शवकर्मणो व्रतान्निवृत्तिरन्यत्र मातापित्रोरिति" । अत्र विज्ञानेश्वराणामयमभिप्रायः । पितामात्रेत्येकशेषः । कटशब्द शववाची । तत्राशौचे लक्षणेति ।

अस्मद्देशे आचार्योपाध्यायाशौचस्यानादृतत्वात्तद्विषये न किंचिन्निबद्धम् "पितर्यपि मृते नैषाम्" इति वाक्यं हि ब्रह्मचारिणः पितृमातृमृतावपि तदाश्रमविहितकर्मप्रतिपादकम् । न तु पितृमातृप्रेतकर्मनिवारकं, अन्यथा याज्ञवल्क्यवशिष्ठवाक्यविरोधः स्यात् । ब्रह्मचारी द्विविधः । यथा -

द्विविधो ब्रह्मचारी स्यादाद्यो ह्युपकुर्वाणकः ।
द्वितीयो नैष्ठिकश्चैव तस्मिन्नेव व्रते स्थितः ॥

इति दक्षोक्तेः । ४६ ।

एकाहं स्यात् प्रयाते मरणमनुपनीतासपिण्डेऽथ सद्यः -
शौचास्तक्षादिशिल्पिद्विजनिचयमृतौ सूपकारादिकारुः ।
अन्यानिर्वाह्यकार्येष्वगतिपु च निजेष्वेकभूमीपतीष्टो
वैद्यः सत्री च भूपानुचरनृपतयो दासदास्यावमात्याः ॥ ४७ ॥

हारीतः - "एकाहमसपिण्डतः" इदमनुपनीतासपिण्डपरम् । सद्यः शौचे विष्णुः "नाशौचं राज्ञां राजकर्मणि, न व्रतिनां व्रते, न सत्रिणां सत्रेषु, कर्मणि च राजाज्ञाकारिणां, न कारूणां कारुकर्मणि" ।

प्रचेताः - कारवः शिल्पिनो वैद्या दासदास्यस्तथैव च ।
राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्त्तिताः ॥

कारवः सूपकारादयः । शिल्पिनो वर्द्धकी-चित्रकार-शौचिक-चैलनिर्णेजक-तन्तुवायादयः । दासस्तु-

अधिकारी तु यो यस्य स दासस्तस्य कीर्त्तितः ।

इति लघुहारीतोक्तलक्षणः । व्यासः -

चिकित्सको यत् कुरुते तदन्येन न शक्यते ।

तस्मात् चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः ॥

पराशरः - **''यस्य चेच्छन्ति ब्राह्मणाः''** । बहवो ब्राह्मणा सम्भूय यस्य शुद्धिमिच्छन्ति तस्य शौचमित्यर्थः ।

याज्ञवल्क्यः - **''यस्य चेच्छति भूमिपः''** । (३-२७)

अतएव **''यस्य चेच्छन्ति नरेन्द्रा''** इति शातातपोक्तौ बहुत्वमविवक्षितम् । तस्मादेकेनापि मूर्द्धाभिषिक्तेन यस्य इष्यते, तस्य सद्यःशौचम् । पराशरः **''वैद्यामात्यास्तथैव च''** । अशौचेऽपि शिल्पादिकर्मणामन्यानिर्वाहे तैरेव शिल्पिप्रभृतिभिर्यज्ञपात्रादितक्षणादिकं तत्कर्म कार्यं, तेषां तत्तत्कर्मसु तात्कालीनशुद्धिरित्यर्थः ।

एवं सति श्रीपुरुषोत्तमक्षेत्रे श्रीजगन्नाथादि मूर्त्तिनिर्माणादौ तच्छिल्पिनां अशौचाभावसमाचारः तन्मूल एव ॥ ४७ ॥

कोपादेः स्वेच्छयाम्भोविषभृगुपतनोद्वन्धनैर्वैद्युताग्न्य -

स्त्राग्न्याद्यैर्द्वीपिघृष्टिस्वपचभुजगगो शृङ्गिदंष्ट्रादिहिंस्रैः ।

राज्ञा विप्रेण नष्टेऽनशनमृतमहापापिनश्चाभिशस्ते

सद्यः शौचं च पूर्ण्णं त्वनवहिततया दुर्मृतौ स्याच्च वैध्याम् ॥ ४८ ॥

कोपादेरिति अपमानादेः सङ्ग्रहः । वैध्यां दुर्गतावपि विधिविहिते दुर्मरणेऽपीत्यर्थः । पराशरः -

अपमानादथ क्रोधात् स्नेहात् परिभवात् भयात् ।

उद्वध्य म्रियते नारी पुरुषो वा कथंचन ॥

पूयशोणितसंपूर्ण्णे अन्धे तमसि दारुणे ।

षष्टिसहस्रवर्षाणि हत्वात्मानं वसेन्नरः ॥

गौतमः - प्रायोऽनशनशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम् ।(५-११)

शङ्खः - भृग्वग्न्यनशनाम्भोभिर्मृतानामात्मघातिनां ।
पतितानां च नाशौचं शस्त्रविद्युद्धताश्च ये ॥ (१५-२०)

तथा - व्यापादयेदथात्मानं स्वयं योऽग्न्युदकादिषु ।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया ॥

विष्णुपुराणे - बाले देशान्तरस्थे च पतिते च मुनौ मृते ।
सद्यः शौचं तथेच्छातो जलाग्न्युद्बन्धनादिषु ॥

स्मृत्यन्तरे- स्वेच्छया मरणे विप्रा शृङ्गिदंष्ट्रिसरीसृपैः ।
अन्यान्त्यजविषोद्बन्धैरात्मना चैव ताडनैः ॥
संपूर्ण्णं सर्वगात्राणां विषाद्याकर्षणेऽपि वा ।
विषाग्निगर्भपातैश्च रोहारोहादिभिस्तथा ॥
येषामेव भवेत्ते वै कथिताः पापकर्मिणः ।
पाषण्डमाश्रिताश्चैव महापातकिनस्तथा ॥
स्त्रियश्च व्यभिचारिण्य आरूढपतितास्तथा ।
न तेषां स्नानसंस्कारौ न श्राद्धं न सपिण्डता ॥

सद्यःशौचे मनुः - (५-९५)
डिम्भाहवहतानां च विद्युता पार्थिवेन च ।

आहवे हतस्येति पराङ्मुखहतस्येति बोध्यम् । अन्यथा महाभारते महता प्रबन्धेन उक्ता उदकादिक्रिया व्यर्था स्यात् । इदं सद्यः शौचं क्रोधादिना बुद्धिपूर्वतया यत्र मरणशङ्का तत्रावस्थितं भवति । प्रमादेन यद्वा विधिवाक्येन विहित-भृगुपातादिना दुर्मरणेऽपि संपूर्ण्णाशौचमेव । तथा च शङ्खाङ्गिरसौ -

अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिषु ।
तस्याशौचं विधातव्यं कार्या चास्योदकक्रिया ॥

दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि ।
प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा ॥

तथा - स्वयं देहविनाशे तु काले प्राप्ते महामतिः ।
उत्तमानाप्नुयाल्लोकान् नात्मघाती भवेन्नरः ॥

यत्तु - वृद्धश्चैव क्रियालुप्तप्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमशौचं द्वितीये त्वस्थिसंचयः ।
तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत् ॥

इति शातातपवाक्यम् । तस्य सगुणनिर्गुणत्वविचारस्य कलीतरविषयम् । एवं कालिदासचयिनिभिर्युद्धे पराङ्मुखहतस्यापि कालान्तरे मृतौ यत्त्र्यहाशौचं लिखितं, (शु.च.श्लो.२०) अन्यत्रापि यद्व्यवस्थापितं, तत्सर्वं कलीतरविषयमेवेति ज्ञेयम् ॥ ४८ ॥

नष्टे मातामहे तु श्वशुरगुरुषु वा मातुलेऽशौचमुक्तं
त्यक्त्वा स्नानोपवासौ विदधति सुधियस्तत्प्रियाणां च नाशे ।
नाशौची ब्रह्मवित्स्यात्सकल इह यतिर्नैष्ठिकब्रह्मचारी
वानप्रस्थोऽप्यवृत्तिर्हरिभजनपरस्त्यक्तसद्मापि शूद्रः ॥ ४९ ॥

यद्यपि स्मृतिषु मातामहश्वशुरगुरुमातुलानां मातामहीश्वश्रु-गुरुपत्नीमातुलानीनां त्र्यहपक्षिण्याद्यशौचमुक्तं, तथापि तदनादृत्य स्वगृहे तन्मरणेऽपि वार्त्ताश्रवणेऽपि स्नानोपवासावेव समाचरन्तीति शिष्टाः । पूर्वं तत्तत्कर्मणां तत्तत्कर्मसु अशौचाभावमुक्त्वा इदानीं यतिप्रभृतीनां नैवाशौचमित्याह नाशौचीत्यादिना । यद्यपि

सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥

इति याज्ञवल्क्याद्युक्तिषु (३/२७,२८) व्रतिप्रभृतीनामपि सद्यःशौचं साधारण्येनोक्तम् । तथापि -

नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणां ।

नाशौचं कीर्त्यते सद्भिः ॥

इत्यादि वाक्यादेकदण्ड्यादिसकलसंन्यासिनां नैष्ठिक-ब्रह्मचारिदातृब्रह्मविदां प्रतिग्रहनिवृत्तवानप्रस्थानां च सर्वथा नाशौचं, **'नाशौचं विद्यते क्वचिदिदि, त्यनुवृत्तौ वानप्रस्थस्य सर्वदा ।'**

प्रतिग्रहाधिकाराच्च निवृत्तस्य न विद्यते ।

इति छन्दोगपरिशिष्टोक्तेः । प्रतिग्रहनिवृत्तित्वं वनस्थानामिति वाक्येऽप्यन्वेति । तथा च सवृत्तिवानप्रस्थे नाशौचं कार्यम् । उपकुर्वाणकब्रह्मचारिणोऽशौचाभावेऽपि पितृविषयेऽशौचस्योक्तत्वान्नैष्ठिकब्रह्मचारिण एवाशौचाभाव उक्तः । यदि शूद्रोऽपि पुत्रकलत्रादिकं त्यक्त्वा वैष्णवो भवति, तदा तस्यापि यतिवदशौचाभावः ।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।

इति सर्ववर्ण्णाश्रमसाधारण्येन श्रीभगवदुक्ते (१८-६६) रिति वदन्ति । हरिपदस्य उपलक्षणत्वात् हरादिसर्वदेवैकभक्तानां त्यक्तगृहाणां नाशौचम् ।

यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति ।

तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥

इत्यादि भगवदुक्तेः (८-२१) ।

सर्वदेवनमस्कारः केशवं प्रति गच्छति ।

इति पुराणान्तरोक्तेश्च ॥ ४९ ॥

दाहे वाहे शवस्यानुगमनकरणे स्नानप्राणायामश्चा-

र्द्रास्थिस्पर्शे सजातेरिदमपरुदिते यावदस्थ्नश्चितिः स्यात् ।

ऊर्द्ध्वं त्वाचाममात्राद्भवति हि शुचिताऽथो न शूद्रस्य विप्रा

दाहं वाहं शवस्यानुगममपि तथा रोदनं जातु कुर्युः ॥ ५० ॥

सजातीयशवस्य वहनदहनानुगमने च केवलस्पर्शे च सजातीयार्द्रास्थिस्पर्शे च अस्थिसंचयनावधिरोदने च ज्ञातिभिन्नानां निर्हरणाद्यशौचापगमार्थं स्नानं

प्राणायामश्च। तथा च याज्ञवल्क्यः - (३-१४)

प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि।
इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात्॥

संयमात् प्राणायामात्। परेषां ज्ञातीनाम्। अङ्गिराः -

प्रेतसंस्पर्शसंस्कारैर्ब्राह्मणो नैव दुष्यति।
अथवाऽप्यग्निदाता च सद्यःस्नात्वा शुचिर्भवेत्॥

तत्राग्निदातुः स्नानेन सद्यःशौचं तत्कर्मण्येव नान्यतः।

बौधायनः - 'शवोपस्पर्शनेऽनभिसन्धिपूर्वं सचेलोऽपः स्पृष्ट्वा सद्यः शुचिर्भवति, अभिसन्धिपूर्वे त्रिरात्रमृतुमत्यां च'।

अभिसन्धि धनदानादिकेच्छा। सचेलोऽपः स्पृष्ट्वा स्नात्वेत्यर्थः।

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्।
यद्यन्नमत्ति तेषां च दशाहेनैव शुध्यति।
अनश्नन्नमह्नैव न चैतस्मिन् गृहे वसेत्॥

इति मनूक्तिस्तु (५/१०१-१०२) कलीतरविषयाः।

अनुकम्प्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा।
स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥

इति वाक्यान्तरात् (मनु. ५-१०३)। 'न वर्धयेदघाहानी' ति तद्वाक्यान्तराच्च नाशौचाधिक्यादर इत्यस्मद्देशीयाः।

मनुः - नारं स्पृष्ट्वास्थि सस्नेहं स्नात्त्वा विप्रो विशुध्यति।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा॥ (५-८७)

एतत्सजातीयास्थिविषयम्। ब्राह्मे -

मृतस्य यावदस्थीनि ब्राह्मणस्याहृतान्यपि।
तावत्तद्बान्धवास्तत्र रौति चेद्बान्धवैः सह॥
ततः स्नात्वा भवेच्छुद्धिस्ततूस्पृष्ट्वाऽऽचमनं चरेत्॥

ऊद्ध्र्वमाचमनमिति । यावदस्थिसंचयनं न क्रियते, तावद्बान्धव उदासीनोऽपि रौति चेदित्यर्थः । सजातीयविषयं चैतत् । क्षत्रियवैश्ययोः कलियुगेऽभावात्तच्छवस्य स्पर्शविचारो न कृतः । शूद्राणां वहनदहनादिकं ब्राह्मणैः सर्वथा न कार्यम् ।

ब्राह्मणो न दहेच्छूद्रं मित्रं वाप्यन्यमेव वा ।
मोहाद्दग्ध्वा ततः स्नातः स्पृष्ट्वाग्निं प्राशयेद् घृतम् ॥
उपवासरतः पश्चात् त्रिरात्रेण विशुध्यति ॥

इति प्रायश्चित्तोक्तेः ।

ब्राह्मणेनानुगन्तव्यो जातु शूद्रः कथंचन ।

इति याज्ञवल्क्योक्तेः (३-२६) ।

विप्रैर्दग्धाश्च ये शूद्रा गतिं तेषां ब्रूवाम्यहम् ।

इति जैमिनीयरामायणे भारतवाक्ये दोषोक्तेश्चेत्यलमतिविस्तरेण ॥ ५०॥

प्रेतस्पर्शो दिवा चेन्निशि, निशि तु दिवा ग्राम उक्तः प्रवेशो,
यद्वादाय द्विजाज्ञामतिविपदि पुनः सोऽवधिर्न प्रतीक्ष्यः ।
पुत्राणामाहुरेके वपनमिति परे सर्वसापिण्ड्यभाजां
केचित् प्रेतावराणां मृतिदशमदिनेऽपि स्त्रियस्तन्निपिद्धम् ॥ ५१ ॥

पारस्करः (३.१०.३४) -

'प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात् । रात्रौ चेदादित्यस्य' ।

प्रेतस्पर्शानुवृत्तौ हारीतः - **'ब्राह्मणानामनुमत्या वा'** ।

तथा च यदा ग्रामप्रवेशं विना आत्यन्तिकः कार्यनाश आपद्येत, स्पर्शिनोऽशक्तिर्वा, तदा ब्राह्मणाज्ञां गृहीत्वा पूर्वोक्तावधिमुल्लंघ्य ग्रामप्रवेशोऽप्यदोषः । स्मृत्यन्तरे -

गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते ।
मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥
वर्जयित्वा कुरुक्षेत्रं विशालं विरजां गयाम् ।

मृते मरणे। नैमिषं पुष्करं गयामिति पाठान्तरम्। अत्र यन्मुण्डनमुक्तं तन्मातापित्रोर्मरणावधि दशमाह एव। उपवासो मृताह एवेत्यस्मद्देशसमाचारः। 'पितृमात्रपघात' इति आग्नेयोक्तेः। देशविशेषे तु गङ्गायामिति वाक्ये 'मातापित्रोर्मृतेऽह्नी' ति पठित्वा मातृपितृमरणदिनेऽपि क्षौरं कुर्वन्ति। अस्मद्देशे तु - आर्द्रवासाश्च मलिनः श्मश्रुलो दशभिर्दिनैः।
मातापित्रोः क्रियां कुर्यात् ज्ञातिवन्धुसमन्वितः॥

इति बृहस्पत्युक्तेः। श्मश्रुलः क्रियां कुर्यादित्यभिधानात् क्रियाकर्त्तुर्दशमदिनात् पूर्वं क्षौराभावसमाचार इति क्रियाकर्त्तुर्वपनम्। पारस्करः 'वपनं चानुभाविनाम्'। अनु पश्चाद् भावयन्तीति अनुभाविनः। प्रेतकनीयांसस्तेषां तथा च प्रेतज्येष्ठानां न वपनमित्यस्याभिप्रायः। केचित्तु -

तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च।

इति याज्ञवल्क्योक्तेः सर्वसपिण्डानां क्षौरमिति। पक्षत्रयेऽपि स्त्रीणां नैव क्षौरम्।

प्रायश्चित्ते समुत्पन्ने प्रेतकृत्ये तु योषिताम्।
निषिद्धं वपनं केचित् तीर्थेष्वपि यथेच्छया॥

इति स्मृतेः॥ ५१॥

न स्यादाचार्यमाता पितृमरणदिनाद् द्वादशाहान्यधीति-
र्न स्याच्छिष्ये गुरौ ऋत्विजि च मृतिमति त्रीणि च स्युर्दिनानि।
ग्रामान्तःस्थे शवे नाध्ययनमभिहितं नीयमाने च दृष्टे
स्वग्रामीणे मृतेनाशनमतिनिकटग्रामगेऽपि प्रमीते॥ ५२॥

अनध्यायानुवृत्तौ आपस्तम्बः 'वैरमरणं गुरुष्वष्टाख्ये त्र्यहम्'। तद्यथा - 'मातरि पितर्याचार्ये च द्विदशाहमिति'।

वीरमरणमेव वैरमरणमिति अध्ययननिवृत्तिरित्यर्थः। गुरुषु प्रेतेष्वित्यनुषङ्गः। अष्टाख्ये अष्टकायाम्।

उपनीय ददद् वेदमाचार्यः स उदाहृतः ।

इति याज्ञवल्क्योक्तलक्षणे (१-३४) आचार्ये 'ऋत्विक् यज्ञकृदुच्यत' इत्युक्तलक्षणे (१-३५) ऋत्विजि । याज्ञवल्क्यः (१-१४४) -

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।

तथा - (या.स्मृ. १-१४८)

अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ।

अनध्ययनानुवृत्तौ नारसिंहे 'नीयमानं शवं दृष्ट्वेति' ।

मनुः - स्वग्रामे ग्रामतो वापि सन्निकृष्टे मृतेऽपि वा ।

न भुञ्जीताशनं धीमानधर्म्यं शोककारणात् ॥

स्वग्रामे स्वग्रामीणे । ग्रामतः सन्निकृष्टे सन्निकृष्टग्रामीणे इत्यर्थः ॥ ५२॥

वर्षान् पञ्चोत्तरांश्चेत्पितरि दशगते नागतिर्नापि वार्त्ता
त्वन्येषु द्वादशाब्दान् तदुपरि निखिलं प्रेतकर्मादि कार्यम् ।
जीवंश्चेत् कश्चिदायात्तमपि घृतघटे प्राश्य चोद्वास्य कार्यं
जाताद्यं कर्म नेहाजिनधृतिवपने मेखलादण्डभिक्षाः ॥ ५३ ॥

इत्येवं संस्कृतः सोऽप्यचल उपवसेद् द्वादशाहं त्र्यहं वा
तस्मादागत्यपूर्वां स्त्रियमपि विवहेत्तद्विनाशे तथान्यां ।
साग्नेरायुष्मतीष्टिस्त्विह भवति पुरोडाशकोऽष्टाकपाल-
श्चैन्द्राग्नेयो निरग्नेश्चरुरिह तु मतः सोऽयमायुष्मताख्यः ॥ ५४ ॥

प्राश्य घृतकुम्भे क्षिप्त्वा । अचले पर्वते । जाताद्यं कर्म जातकर्मादि पुनः संस्कार इत्यर्थः । मार्कण्डेयः -

गतस्य न भवेद्वार्त्ता यस्य द्वादशवार्षिकी ।
प्रेतावधारणं तस्य कर्त्तव्यं सुतबान्धवैः ॥
पिता प्रवसितो यस्य न च वार्त्ता न चागमः ।
ऊद्ध्वं पञ्चदशाद्वर्षात्ततः पिण्डोदकक्रिया ॥

सुततुल्या बान्धवाः सुतबान्धबा इति मध्यपदलोपिसमासः । अन्यथा पितेत्यादि तदनन्तरवाक्यस्यासंलग्नता स्यात् । तथा च जातुकर्ण्णः -

पितरि प्रोषिते यस्य न वार्त्ता नैव चागतिः ।
ऊर्द्ध्वं पञ्चदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम् ॥
कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः ।
तदानीमेव सर्वाणि प्रेतकार्याणि संचरेत् ॥

हारीतेन तु - प्रोषितस्तु पिता पुत्रैः प्रतीक्ष्यो विंशतिः समाः ।
जीर्णः पञ्चदशाब्दानि पश्चान्मृतवदाचरेत् ॥

इति विंशतिवर्षपक्ष उक्तः । स पक्षो नाद्रियते इति । विहितक्रियस्य जीवतस्तस्य दैवादागमने बृहन्मनुः -

जीवन् यदि समागच्छेद् घृतकुम्भे नियोज्य तं ।
उद्धृत्य स्थापयित्वास्य जातकर्मादि कारयेत् ॥
द्वादशाहं व्रतं कुर्यात्त्रिरात्रमथवास्य तु ।
स्नात्वोद्वहेत्ततो भार्यामन्यां वा तदभावतः ॥
अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत् ।
तथैवैन्द्राग्निपशुना गिरिं गत्वा च तत्र तु ।
इष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्तथा ॥

इदं साग्नेः । निरग्नेस्तु चरुरेव स चैन्द्राग्नेयः । तदुक्तं गृह्यप्रायश्चित्ते 'य आहिताग्ने पुरोडाश एव अनाहिताग्नेश्चरुर्भवतीति' । पुनरुपनयने वर्ज्याण्याह मनुः -

वपनं मेखला दण्डो भैक्ष्यचर्या व्रतानि च ।
न वर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि ॥ (११-१५१)

तत्र बृहन्मनूक्तवचनस्यार्थक्रमः कालादर्शकारिकायां स्फुटमुक्तः ।

यदाऽऽगच्छेत् पुमान् जीवन् सपैत्रोऽधिकसंस्कृतः ।
घृतकुम्भे स्थापयित्वा तमुद्वास्य शुभे क्षणे ॥

संस्कृतं जातकर्माद्यैरुपनीतं विधानतः ।
द्वादशाहं त्रिरात्रं वा विहितोपोषणं व्रतम् ॥
गृहावागत्य पूर्वां वा तदभावे परां स्त्रियम् ।
ऊढवन्तं च संस्कुर्यात् चरुणायुष्मतेन च ॥

इति कारिकयोः ॥ ५३-५४ ॥

अथ ग्रहणाशौचम्

पूर्वं स्याद्ग्रासयामादनशनमघमप्युष्णरश्मेश्चतुष्कं,
यामानां शीतरश्मेस्त्रितयमभिहितं ग्रासयामादधस्तात् ।
इन्दो ग्रस्तोदितत्वं गतवति च चतुर्यामकान् पूर्वतोऽपि
ग्रस्तावस्तं गतौ तौ यदि परदिवसे तूदयान्तं तयोस्तत् ॥ ५५ ॥
श्रौतस्मार्त्तादिकर्माण्यपि रविशशिनोः स्युर्ग्रहाशौचमध्ये
नेहास्यं स्पृष्टमन्नं श्रुतिमपि गदितोऽहानि न त्रीण्यधीतिः ।
श्राद्धं यद्वार्षिकाब्दं ग्रहणसमयजं वा तदामैः पदार्थैः
हेम्ना वा स्यादथान्नैः परमिह निखिलं प्रेतकृत्यं तु पक्वैः ॥ ५६ ॥
चन्द्रे ग्रस्तास्त एतत्परदिनपतितं वार्षिकं श्राद्धमामै -
र्हेम्ना वा पूर्ववत् स्यादिति कृतिविदितैर्विप्रमिश्रैरलेखि ।
हेमामैः श्राद्धसिद्धिर्भवति न हि पुनर्भोजनं यन्निषिद्धं
तच्छ्राद्धब्राह्मणोऽतिक्रमितुमिह वचोऽस्तीति युक्तिः कृताऽपि ॥ ५७ ॥

ब्रह्मपुराणे -

अशौचं जायते नृणां ग्रहणे चन्द्रसूर्य्ययोः ।
बान्धवानां च मरणे राहुस्पर्शे विशांपते ॥
ग्रहणे शावमाशौचं विमुक्तौ सूतकं स्मृतम् ।

ग्रासमुक्त्योरपि स्नाननिमित्तत्वमुक्तवान् व्यासः -

नाद्यात् सूर्यग्रहात् पूर्वमह्नि सायं शशिग्रहात् ।
ग्रहकाले च नाश्नीयात् स्नात्वाऽश्नीयाद् विमुक्तयोः ॥
मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा ।
अमुक्तयोरस्तगयोरथ दृष्ट्वा परेऽहनि ॥

सार्द्धप्रथमयामादूर्द्ध्वं मुहूर्त्तचतुष्टयं महानिशेति लक्ष्मीधरः । ग्रहणपूर्वकाले भोजनाभावे विशेषमाह वसिष्ठः -

ग्रहणं चेद्भवेदिन्दोः प्रथमादधियामतः ।
भुञ्जीतावर्त्तनात् पूर्वं पश्चिमे प्रथमादधः ॥
रवेश्चावर्त्तनादूर्द्ध्वमर्वागेव निशीथतः ।
चतुर्थप्रहरे चेत् स्याच्चतुर्थप्रहरादधः ॥

रात्रौ प्रथमयामादूर्द्ध्वं चन्द्रग्रहणं चेत् तदाऽऽवर्त्तनात् मध्याह्नात् पूर्वं भुञ्जीत । रात्रौ पश्चिमे चेद् रात्रिप्रथमयामादर्वाक् भुञ्जीत ।

सूर्य्यस्य तु दिवावर्त्तनान्मध्याह्नादूर्द्ध्वं ग्रहणं चेत् तथा निशीथतोऽर्धरात्रादर्वाक् भुञ्जीत । तथा च चन्द्रग्रहणे यामत्रयेण व्यवधानम् । सूर्य्यग्रहे तु यामचतुष्टयेनेति तात्पर्य्यार्थः । तथा च स्मृतिः -

'सूर्य्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ॥'

बालवृद्धातुरविषये मात्स्ये -

अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे ।
ग्रहणं संगवे चेत् स्यान्न पूर्वं भुक्तिमाचरेत् ॥

चन्द्रग्रहणे ग्रस्तोदये वृद्धवसिष्ठः -

'ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् ।'

उभयोर्ग्रस्तास्तमये भृगुः -

'ग्रस्तावेवास्तमनं तु रवीन्दू प्राप्नुतो यदि ।
तयोः परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः ॥'

व्याघ्रपादः -

स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके ।
श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् ॥

षट्त्रिंशन्मते -

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत श्रुतमन्नं परित्यजेत् ॥

श्रुतं पक्वम् । वृद्धवसिष्ठः -

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
सचेलं तु भवेत् स्नानं सूतकान्नं तु वर्जयेत् ॥

ग्रहणकाले ततः पूर्वं यावत्पक्वं तत्सर्वं सूतकान्नं, तत्तु पश्चादपि न भुञ्जीतेति माधवाचार्य्यः ।

मनुः - 'त्र्यहं न कीर्त्तयेद् ब्रह्म राज्ञो राहोश्च सूतके ।' (४-११०)

ब्रह्म वेदः । राज्ञो भूपतेः । ग्रहणे च त्र्यहमनध्ययनमित्यर्थः ।

अतिथिप्राप्त्यादिना ग्रहणे प्राप्ते श्राद्धकालत्वमाह मार्कण्डेयः -

विशिष्टे ब्राह्मणे प्राप्ते सूर्य्येन्दुग्रहणे दिने ।
जन्मादिग्रहपीडासु श्राद्धं कुर्य्यात्तथेच्छया ॥

तच्च ग्रहणश्राद्धं नित्यं काम्यं च । प्रत्यवायोक्तेर्नित्यं कामयोगाच्च काम्यम् ।

तथा च कौर्मे - (उत्त, २०/६-७)

नैमित्तिकं तु कर्त्तव्यं ग्रहणे चन्द्रसूर्य्ययोः ।
वान्धवानां च मरणे नारकी स्यादतोऽन्यथा ।
काम्यानि चैव श्राद्धानि शस्यन्ते ग्रहणादिषु ॥

महाभारते - सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने ।

अकुर्वाणस्तु नास्तिक्यात् पंके गौरिव सीदति ।।

ऋष्यशृङ्ग-शातातपौ -

चन्द्रसूर्य्यग्रहे चैव श्राद्धं विधिवदाचरेत् ।

तेनैव सफला पृथ्वी दत्ता विप्रस्य वै करे ।।

विष्णुः - राहुदर्शने दत्तं हि श्राद्धमाचन्द्रतारकम् ।

गुणवत् सर्वकामीयं पितृणामुपतिष्ठते ।।

गोभिलः - दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।

अन्नेनासम्भवे हेम्ना कुर्य्यादामेन वा सुतः ।।

दर्शे रविग्रहणे तु पूर्वयामचतुष्के पाकाभावादामान्नेन हेम्ना वा तत् करणम् । मुक्त्यनन्तरं श्राद्धकालसम्भवे तु पक्वान्नेनैव तत्करणं स्वतः सिद्धमेव इत्यभिप्रायः । चन्द्रग्रहणे तु ग्रहणात् पूर्वं पौर्णमास्यां कदाचित् श्राद्धसम्भवे तत्रापि हेम्ना आमेन वाऽऽब्दिककरणम् । तथा च बौधायनः -

अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।

हेमश्राद्धं सग्रहे च द्विजः शूद्रः सदाऽऽचरेत् ।।

शातातपोऽपि -

आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा ।

आमश्राद्धं द्विजो दद्यात् शूद्रो दद्यात् सदैव हि ।।

केवलं चन्द्रसूर्य्यग्रहणेऽपि सपिण्डीकरणान्तं सर्वमपि प्रेतकर्म पक्वान्नेनैव कार्य्यम् । तथा च प्रचेताः -

प्रेतश्राद्धं तु कुर्वीत पक्वान्नेनैव सर्वदा ।

स्वयं पाकं प्रकुर्वीत सगोत्रं वापि कारयेत् ।।

अपङ्क्तिकोऽपि सिद्धान्नैः कुर्य्याच्छ्राद्धानि षोडश ।

सपिण्डीकरणादूर्ध्वं त्वामश्राद्धं विधीयते ।।

सर्वदित्युक्तेः सपिण्डीकरणान्तेषु प्रेतकार्य्येषु न कदाचिदपि हेमामयोः प्रसक्तिः ।

ग्रहणप्रकरणे विश्वनाथमिश्रादिभिर्हेमामश्राद्धविधायकवाक्यानि लिखित्वैव ग्रस्तास्तमिते चन्द्रः यावन्नोदित स्यात् । तावन्नाश्नीयादित्यशननिषेधादत्रापि ब्राह्मणाय तन्निषेधातिक्रमणे वचनाभावेनासामर्थ्यां भोजनासम्भवादामेन हेम्ना वा श्राद्धं कार्य्यमिति स्पष्टमभिहितम् । श्राद्धानन्तरं प्रतिपत्तिकर्मणः स्वभोजनस्याप्यसम्भवादित्यपि कैश्चिद् विचारितम् ।

इति कारिकात्रयस्य ।। ५५-५७ ।।

श्रीनीलाम्वरनाम राजगुरुराख्यातो हरेकृष्णभू -

र्नाथप्राप्तगजातपत्रतदभूद् यः कौशिकः कोविदः ।

चक्रे सोऽपि चतुर्मखान् वहुविधान् श्रीशुद्धिसारे कृते

ततपुत्रेण गदाधरेण सुधिया काण्डस्तृतीयो गतः ।। ५८ ।।

इति श्रीगदाधरराजगुरुविरचिते शुद्धिसारे तृतीयो काण्डः ।।

।। समाप्तश्चायं ग्रन्थः ।।

शुद्धिसारः
मूलग्रन्थस्य श्लोकसूची
प्रथमकाण्डः

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
अशेष	१/१
आरम्भस्य	१/९
उद्वाहं	१/१७
एकश्चेदु	१/२१
काम्यारम्भ	१/९
कालद्रव्य	१/६
कालस्या	१/७
कालशुद्धि	१/८
कुर्यात्	१/२०
कुर्यादर्ह	१/५
कुर्वन्त्यल्प	१/६
क्वापि स्पष्ट	१/५
गुर्वादित्य	१/१९
चक्रे योऽपि	१/२२
चैत्रं प्रोज्झ्य	१/१८
जातेष्टिं	१/११
जीवेऽप्यस्त	१/१९
तस्यां सिंह	१/७
नत्वा राज	१/४
नव्यस्त्री	१/१४
नारीनूतन	१/१६
निजालये	१/१
नो मुञ्चेत्	१/१०
प्रसूति	१/११
प्राक्पश्चा	१/१७
प्रेताब्दोद	१/१२
मासश्चा	१/१५
यज्वा यच्च	१/४
यद् विष्णौ	१/१६
यावद्	१/१५
यो नीला	१/३
रचित	१/२
रोगावर्ष	१/१०
लुप्ताब्दे	१/८
वात्स्यो वर्षं	१/१८
विघ्नेश	१/१४
शुद्धे मासि	१/१२
शुद्धे मासि	१/१३
श्राद्धं मासि	१/१३
श्रीनीला	१/२२
षट् चाप्या	१/२०
सन्ध्यास्तं	१/२१
सौवर्णोडु	१/३
स्मृतिनिकर	१/२

द्वितीयकाण्डः

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
अग्राह्य	२/१७७	अमेध्य	२/२०१
अङ्गार	२/५	अमेध्य	२/१०९
अङ्गेषु	२/३५	अमेध्य	२/२१४
अजात	२/१६०	अम्लादिकं	२/१२५
अजानीते	२/५३	अम्लेन	२/६९
अजाविको	२/२०५	अयाचितं	२/१७०
अज्ञात	२/२१०	अलिप्त	२/८२
अज्ञाय	२/२१०	अलोप	२/४९
अत्यन्त	२/५५	अशस्त	२/१६९
अत्यन्तदु	२/७७	अशुष्क	२/३६
अत्यन्तदौ	२/७७	अशोषणे	२/११०
अनेकशो	२/१८२	अशौच	२/९२
अन्तर्गतं	२/१८३	अश्माप्य	२/८१
अन्त्यैः कृते	२/२०	अष्टप्रका	२/१६३
अन्नं शूद्रा	२/१०३	अष्टोत्तरे	२/९४
अन्ननिकृ	२/१४६	असम्भवे	२/१८
अन्नादिके	२/२१८	असम्भवे	२/४७
अन्नादि	२/१४८	असम्भवे	२/१९२
अन्नादिकं	२/१८३	अस्पृश्य	२/२०२
अन्ने विल	२/१४६	आचार	२/२२३
अन्यैः गृह	२/१०८	आच्छाद्य	२/३८
अपक्वता	२/१२७	आद्यान्त्य	२/१
अप्यापण	२/१४५	आत्मीय	२/१३६
अप्युद्धृतं	२/१६	आरब्ध	२/१७१
अभक्ष्य	२/२२२	आलेख्य	२/१४१
अभ्रातृका	२/१३९	आवामुभा	२/१३
अमेध्य	२/५०	आसन्न	२/१३५
अमेध्य	२/१५४		

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
आस्थां प्रति	२/२२०
इष्टिं ह्यव	२/१७४
उक्ता अशु	२/२०३
उच्छिष्ट	२/१४७
उत्सृष्ट	२/२०९
उद्धृत्य	२/२२
उद्यता	२/१७७
ऊर्णे सह	२/१७२
उल्लेखन	२/३
उत्सर्ग	२/२८
एकापि	२/१८५
एतानि	२/१२१
एवं समा	२/११६
एपूदूभ	२/१२३
कन्यालये	२/२११
करेण	२/८८
कल्पादिके	२/२०८
कांस्यं सले	२/६८
कांस्यं च	२/७३
काकादि	२/७५
किन्त्वत्र	२/१५९
कीटादि	२/३८
कीटादि	२/९०
कुण्डाशन	२/१४३
कूपे यदा	२/२२
कूष्माण्ड	२/१५८
कौशेय	२/४९
कौशेय	२/५७

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
कौशेय	२/५९
क्वाथः सरो	२/१२८
क्वापि स्थिता	२/२२०
क्रीते गृही	२/३२
क्षुन्नादितः	२/९७
क्षेत्रे तु या	२/२२१
क्षेत्रेषु	२/१८१
क्षौद्रदधि	२/१७५
क्षौद्राक्त	२/७९
क्षौद्रोदक	२/४२
क्षौमे ससि	२/६०
गंगा कुरु	२/१७९
गंगातटा	२/१८१
गङ्गाजले	२/१८
गण्डूष	२/७४
गते दशा	२/१३
गान्धर्वके	२/१६०
गायत्री	२/१०१
गृहे प्रवि	२/१२
गोक्रान्त	२/४
गोऽग्न्यर्चि	२/७
गोजावि	२/१६३
गोधूमा	२/११५
गोधूम	२/१२०
गोपान	२/१७
गोभूमि	२/१६६
गोमूत्र	२/७६
गोमूत्र	२/८३

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
गोभृंग	२/२०६	ज्ञातौ मृते	२/१२
गोश्चोष्ट्र	२/२०७	तक्रं दधि	२/१६७
गोस्थान	२/८	तक्षा नटो	२/१३९
गौः सूति	२/४७	ततस्तथा	२/२२१
ग्रामाद् बहिः	२/१०	ततोऽन्त	२/११७
ग्राह्यं खल	२/१७५	तत्कर्म	२/५२
ग्राह्यं घृत	२/४६	तत्रैव	२/२१४
ग्राह्यं यदे	२/१६४	तत्सर्षपे	२/१९७
ग्राह्यं रज	२/२९	तथापि	२/२०६
ग्राह्याद्य	२/१७६	तथा सति	२/१६५
ग्राह्येऽप्य	२/१५४	तथैव	२/७१
घ्रातं गवा	२/९७	तदभिन्न	२/९६
चक्रे योऽपि	२/२२४	तदैव	२/४३
चराचरे	२/२३	तद्द्रव्य	२/१४९
चाण्डाल	२/४	तद्द्रव्यस्य	२/१८०
चितिस्थ	२/२०४	तद्भज्ञ	२/२१९
चित्रादिके	२/२१३	तद्विष्णु	२/१५६
चौरस्तथा	२/१४०	तन्त्रोप	२/१४२
जलं क्षणा	२/१५१	तल्लाभ	२/१६६
जलान्तरा	२/२९	तस्माद्	२/१७३
जलावतारे	२/२४	तस्मान्नि	२/१७८
जलाशया	२/२५	तस्मिंस्तु	२/१८६
जलेक्षणात्	२/२११	ताम्बूल	२/२१६
जलेन	२/८२	ताम्रं तथा	२/६८
जलेन	२/१२९	तीर्थादिकं	२/१८२
जान्वादि	२/२०	ते देह	२/१८७
जिह्वाभि	२/२१५	तैलं घृतं	२/१२९
जुहूस्तथा	२/८९	तैलं च	२/१९६

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
तैलं द्रुता	२/४१
तैलं नि	२/१९६
त्यागोऽति	२/८६
त्रिकुम्भ	२/३१
त्रिनीर	२/३१
त्रिसप्त	२/७८
त्र्यहोत्तरं	२/१९
त्र्यहोत्तरं	२/२६
दत्तं द्विजे	२/२५
दत्तं पुनः	२/१९५
दर्शार्के	२/१९८
दशास्वहः	२/१९
दशाह	२/१९२
दाहेन	२/७९
दुग्धादि	२/४४
दुष्टं तदं	२/२१२
दुष्टांश	२/९९
दुष्टा मता	२/२
दोषं गुणं	२/१३७
दोषेऽधिके	२/६५
दोषेऽधिके	२/८४
दोषेऽल्पके	२/१५०
दोषोऽधि	२/५९
द्रव्यं यदा	२/१३४
द्रव्यवि	२/९५
द्रव्यस्य	२/२१७
द्विःपकता	२/११३
द्विजातय	२/७१
द्विजेषु	२/७०
द्वितीय	२/११४
द्विपाकः	२/११२
द्विवार्त्तिके	२/१९३
द्वैस्तन्य	२/४५
धान्यादि	२/१५१
नक्तं त्रिपि	२/३०
नखत्व	२/२
न त्वेतद्	२/१७७
नदेषु	२/२७
नद्यास्तु	२/३३
न माक्षिके	२/१२२
न यद्	२/५६
न स्यात्	२/९५
न स्विन्न	२/११२
नारीधृतं	२/६४
निःस्वातुर	२/१०५
निजेन	२/१५
नित्यादि	२/१२८
निर्य्यास	२/१५२
नैवास्ति	२/१०९
नैवेद्य	२/१५३
नोच्छिष्टता	२/२१८
नौकुण्ड	२/२००
पक्कान्न	२/९८
पक्कान्न	२/१०२
पक्कान्न	२/१०५
पक्केष्टका	२/११

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
पक्केष्टका	२/२३	प्रयोजनो	२/१४१
पट्टादिका	२/६२	प्रस्थप्रमा	२/३९
पद्मोत्पला	२/१९०	प्रार्थ्यापि	२/१६९
पयोर्विका	२/४१	प्राशित्र	२/८९
परं तु	२/१०४	प्रोक्षण्य	२/८८
परं श्व	२/१०१	फलादि	२/१३३
परन्तु	२/२००	फलोद्भवा	२/४३
परन्तु	२/१८०	बद्ध्वादिके	२/६६
परस्य	२/२१३	बलाद्धनं	२/१७१
परान्न	२/१५९	बिल्वस्य	२/१९३
पात्राणि	२/७३	भक्तं यतः	२/१८४
पात्रादधो	२/४८	भक्ष्यं तु	२/१२१
पीतावशि	२/४८	भक्ष्यं पयो	२/४५
पुण्यैक	२/१४३	भक्ष्यं हि	२/११५
पुरोहिता	२/१६४	भक्ष्याणि	२/१५८
पुष्पाणि	२/१९१	भक्ष्येषु	२/१५६
पूगादिके	२/१११	भस्मादिका	२/८७
पूजानियो	२/१८९	भस्मोदका	२/७०
पूर्णं च	२/१०४	भस्मोल्मु	२/८७
पूर्वं गृही	२/१७०	भिक्षा तु	२/१०७
पूर्वं समा	२/१२४	भुक्ते तु	२/१०२
पूर्वेऽह्नि	२/११३	भूमिसम	२/९८
पूर्वोप	२/६१	भूमौ तदा	२/१४८
प्रक्षालना	२/२०२	भूयो व्यति	२/९३
प्रक्षालनो	२/३६	भृष्टो यवो	२/१३१
प्रतिग्रह	२/१४४	भोज्यपथा	२/१३६
प्रपानकं	२/१२३	भोज्यान्न	२/३७
प्रमार्ज्यं	२/७२	मञ्जिष्ठ	२/५६

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
मणिश्च	२/१७६	यथा सहे	२/७४
मणौ तथा	२/८०	यदर्द्ध	२/११४
मण्डुक	२/२०१	यदाति	२/२१७
मत्स्याम	२/१६७	यद्यन्	२/२२२
मन्दार	२/१९४	यद् वाऽग्नि	२/१११
मलीमसा	२/५०	यद् वा	२/१९१
महीक्षितो	२/१६२	यद् वापि	२/२१५
महोप	२/९	यद् वाम्बु	२/८०
मार्ष्ट्यर्कया	२/६९	यद् व्यञ्ज	२/१४७
मासद्वये	२/२६	यस्तैल	२/१९७
मासद्वये	२/२८	या तूलिका	२/५४
मूलं फलं	२/१७५	यान्येव	२/२२३
मृत्सप्त	२/३०	याः स्थापिता	२/२१९
मृत् स्वर्ण	२/९९	ये तर्पण	२/१८८
मृद्भाजनं	२/८५	ये बिन्दवो	२/३४
मेध्या सदा	२/८	ये ब्रह्म	२/१८७
यः प्रत्यहं	२/१७३	ये श्लेष्म	२/३५
य कम्वलः	२/५७	योग्यं सुरा	२/१०६
यच्छौक्तिक	२/९७	यो नैतिक	२/१३४
यज्जातिकः	२/४०	रंगोप	२/१४२
यज्ञविच्छे	२/१७४	रजस्वला	२/९२
यज्ञीय	२/९०	रजस्वला	२/९८
यत्ते गृही	२/१८४	रजोभिः	२/२७
यत्तद्	२/४०	रथ्याहृतं	२/१०६
यत् पातु	२/३४	रसोद्धत	२/१५५
यत् प्रीति	२/१६१	रसोऽपि	२/६३
यत्र क्षेत्र	२/१७८	रागांशुका	२/१२०
यत् संह	२/८६	रागांशुको	२/१३१
यथार्ह	२/६	रात्र्यन्त	२/१२४

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
रैत्यादि	२/९१
लिप्योऽथ	२/८१
लेह्यास्तु	२/१३२
वदन्त्य	२/१५३
वने निशि	२/१४९
वर्षा चतु	२/१५७
वसुन्धरा	२/१
वस्त्रं स्व	२/५२
वस्त्रोदितैः	२/६५
वासोऽन्य	२/६२
वाह्यौदका	२/११८
विच्छेद	२/१७५
विण्मूत्र	२/७६
विण्मूत्र	२/२०४
विप्रस्तु	२/१३५
विप्रे मृते	२/१४
विवाह	२/१००
विवाह	२/१७४
विशुद्ध	२/१६
विष्ठादि यो	२/५१
विष्ठादि रा	२/५१
वैद्यास्तु	२/१३२
वैश्यैश्च	२/६४
व्याधोऽपि	२/१७७
व्योमस्थितं	२/१५
व्रताङ्गता	२/१८५
शतद्वयं	२/१७७
शताम्बु	२/२१
शस्तं तृणं	२/१९९
शाकस्य	२/१५०
शाणं प्रती	२/५८
शुक्तेषु	२/१२६
शुचिर्न	२/१९९
शुच्यम्बु	२/१५२
शुच्या मम	२/१०८
शुद्धं मतं	२/२१६
शुद्धाथ	२/९१
शुद्धाप्य	२/९४
शुद्धोप	२/७२
शुद्ध्यन्ति	२/२४
शुद्ध्यन्त्यर्थ	२/७५
शुष्कं तथा	२/१९४
शुष्कोऽप्य	२/११६
शूद्रस्य	२/१६८
शूद्रादि	२/४४
शूद्रादि	२/११०
शूद्रादितो	२/१७४
शूद्रादिभिः	२/१०३
श्वमृत्तिका	२/७८
श्वव्याघ्र	२/१४५
श्वाघ्राण	२/१००
श्वादेर्बहि	२/१४
श्राद्धे तथा	२/१२२
श्रीकृष्ण	२/१८६
श्रीनीला	२/२२४
संक्षालिता	२/२१२
संघतक	२/३९
संचूर्णिता	२/१३०

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
संछादितं	२/१२६	सा कुक्कु	२/५
संतन्य	२/२०८	सारिष्ट	२/६०
संमार्जनाद्	२/३	सिक्ताम्भसा	२/५४
संस्कारकं	२/१५७	सुगर्व	२/५३
संस्पृश्य	२/८३	सुवर्ण	२/६७
संस्पृष्ट	२/१२७	सुवर्ण	२/१९५
सकन्धुश्च	२/११९	सुस्नेह	२/१३३
सक्तुर्यदा	२/१३०	स्कन्धस्य	२/२०७
सच्छूद्रतो	२/१६८	स्त्रीपाद	२/२०५
सदा तिल	२/१९८	स्नानाय	२/१७
सद्धार्मिका	२/१६५	स्नानेऽपि	२/३२
सद् व्रा	२/१४४	स्नेहाक्त	२/११९
सद् व्रा	२/१६१	स्पर्शेऽनी	२/२०३
सनारि	२/१५५	स्पृश्यं त्व	२/६३
सन्ध्यादि	२/१८८	स्पृष्टं परि	२/८५
सम्मार्जनं	२/६	स्पृष्टा अपि	२/११
समर्पितो	२/१३७	स्पृष्टे तु	२/११७
सर्वं द्रव	२/४२	स्यात् केत	२/१९०
सर्वत्र	२/१०	स्यात् तत्	२/१७९
सर्वत्र	२/६६	स्यादंशु	२/५८
सर्वप्रका	२/१६२	स्याद् वेश्म	२/७
सर्वेषु	२/२१	स्यान्नारि	२/८४
सर्वेषु	२/३७	स्युः शंख	२/६७
स लोह	२/१४०	स्वकुम्भ	२/१३८
स वर्जितैः	२/१८९	स्वस्थेऽपि	२/१२५
स शूद्र	२/१३८	स्वस्थैः गृह	२/१०७
संस्नेह	२/११८	स्विन्नत्व	२/१०९
सहस्र	२/६१	हरिद्रया	२/५५
सहस्र	२/९३	हतावशिष्टं	२/४६

तृतीयकाण्डः

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
अग्निषोमी	३/१६	किन्तु स्यात्	३/६
अङ्गाशौचं	३/२४	किन्तु स्यु	३/२५
अन्यानिर्वा	३/४७	किन्त्वापद्ये	३/१६
अब्देऽतीते	३/३६	किन्त्वाशौची	३/१७
अशौचान्नं	३/१४	कृच्छ्राद्य	३/१३
अस्पृश्य	३/९	केचित्	३/५१
अस्मिंस्ताव	३/२२	कैश्चित्	३/४६
आरब्धं	३/११	कोपादेः	३/४८
आरम्भो	३/१३	खण्डे भागं	३/२४
आशौचे	३/६	ग्रस्तावस्तं	३/५५
आशौचे	३/४२	ग्रामान्तःस्थे	३/५२
इत्येवं	३/५४	ग्राह्या उक्त	३/१८
इन्दो ग्रस्ता	३/५५	चक्रे सोऽपि	३/५८
इष्टं त्वाति	३/२७	चन्द्रे ग्रस्ता	३/५७
उत्थानं	३/१५	चातुः प्राश्ये	३/१६
ऊढा पुत्री	३/४४	च्छेदोर्द्ध्वं	३/३२
ऊर्द्ध्वं त्वाचा	३/५०	च्छ्रौतेना	३/४
एकः प्रेतः	३/३३	जातप्रेते	३/३२
एकाग्रे	३/४	जाताद्यं	३/५३
एकाहं	३/४७	जीवः सप्त	३/३
एवं सत्ये	३/३	जीवश्चेत्	३/५३
कादौ काष्ठे	३/१७	ज्ञाते सद्यः	३/३५
कालस्नाना	३/१	ज्ञाते सद्यो	३/३४
काले तेषां	३/३४	ज्ञातीनां	३/३२
किन्तु श्राद्धा	३/८	ज्ञातीनां	३/४३

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
ज्ञानं स्यात्	३/२
ज्ञानेऽश्नीयु	३/१४
तच्छुद्धौ	३/२३
तच्छ्राद्ध	३/५७
तत्पुत्रेण	३/५८
तत्राद्ये	३/४०
तत्रादौ	३/३९
तत्राशौचं	३/४४
तद्धन्ना	३/१०
तन्मध्ये	३/२६
तस्मादा	३/५४
तस्मिन्	३/६
तस्यां मृत्यां	३/४४
तातस्यैका	३/३९
तुर्याद्या	३/२
तुर्याहि	३/३०
त्यक्तोदक्यां	३/३७
त्यक्त्वा स्नानो	३/४९
त्यक्त्वाऽस्मिन्	३/२२
त्रीन् मासान्	३/२६
त्वन्येषु	३/५३
थोक्तं कर्मा	३/३९
दर्शादौ	३/२८
दर्शश्राद्धा	३/७
दम्पत्त्यो	३/५
दानं नित्य	३/२७

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
दानश्राद्धा	३/१२
दाने स्मार्त्त	३/७
दारब्ध	३/२०
दाहं वाहं	३/५०
दाहे वाहे	३/५०
दाहेऽशौचं	३/५
दाहोर्द्ध्वं	३/४
दिष्वारम्भः	३/१२
दीर्घं चाल्पं	३/३७
दुग्धे दध्या	३/१७
दुर्भिक्ष	३/१२
देवार्चा	३/११
देहे स्यात्	३/१
द्रव्यादाना	३/२६
द्राँस्थिस्पर्शे	३/५०
धान्याद्यं	३/१८
नष्टे माता	३/४९
न स्नानं	३/१९
न स्याच्छि	३/५२
न स्यादा	३/५२
नान्येषां	३/२८
नाब्दोत्पन्नं	३/८
नाशौची	३/४९
नाशौचे	३/२१
नास्त्येवा	३/४
नाथप्राप्त	३/५८

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
नित्यः सोमो	३/२१
नित्यं स्नात्वा	३/३८
नित्यासक्त	३/१३
नीरं दत्त्वैव	३/४५
नेहास्यं	३/५६
नोद्वाहे	३/२८
नो युक्तः	३/२२
न्तं सर्वं	३/४०
न्तर्वेदी	३/२७
पक्के सक्तौ	३/१७
पक्षिण्यन्त	३/४१
पत्नी पत्या	३/४२
पर्णो दाहो	३/४३
पश्चादन्य	३/५
पित्रोः पुत्री	३/३५
पित्रोराशौ	३/३९
पित्रोरेका	३/४०
पित्रोर्मध्ये	३/२२
पित्रोर्मृत्युं	३/३८
पित्रोर्मृत्यां	३/४६
पित्रोर्मृत्यां	३/२५
पित्रोस्तद्	३/१९
पित्र्यं कर्म	३/२५
पुत्रस्य	३/४१
पुत्राणामा	३/५१
पुत्रे पित्रो	३/३४

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
पूर्वं स्याद्	३/५५
पूर्वारम्भे	३/१२
पूर्वाशौचे	३/१९
त्यत्तौ तिस्रो	३/३१
त्यन्नाः शुध्य	३/२९
प्यब्दे कुर्या	३/३८
प्योत्थानं	३/१५
प्राणाहुत्यः	३/९
प्रारब्धे	३/१०
प्रेतस्पर्शो	३/५१
प्रेतान्नं	३/१५
प्रेतान्नं	३/४६
प्रेते साग्नौ	३/८
प्रेतोऽन्यः	३/३३
बाह्यं चाभ्य	३/१
भुक्तयर्द्धे	३/१४
भेदेऽप्यत्रो	३/४२
भेदोऽथ	३/३६
भ्रातुः स्नानं	३/३५
मज्ञाने	३/३
मध्येऽब्दं	३/४१
माता ताता	३/४०
मातुः सूत्य	३/२४
मानस्ये	३/११
मासद्वन्द्वा	३/३६
मृत्यौ किञ्चित्	३/४४

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
यज्ञश्चारा	३/२७	शौचास्तक्षा	३/४७
यज्ञेऽपेक्ष्यं	३/१६	शौचे कृत्वा	३/२३
यद् बाधा	३/१०	शौचे कृत्वा	३/२३
यद् वादाय	३/५१	शौचेऽङ्गा	३/२४
यागोऽशौचे	३/२३	शौचेऽथ	३/३०
यामानां	३/५५	श्चैन्द्राग्नेयो	३/५४
यागोद्वा	३/१४	श्राद्धादौ	३/१३
यावत्	३/४१	श्राद्धे त्रैप	३/८
योषित्	३/२९	श्रीनीला	३/५८
योषिद्	३/३०	श्राद्धं यद्	३/५६
राज्ञा विप्रे	३/४८	श्रौताग्रा	३/२०
रामान्नं	३/१५	श्रौताग्नेः	३/४३
वन्ते पर्व	३/२१	श्रौताद्यं	३/११
वर्षान्	३/५३	श्रौताधान	३/५
वाग्दाने	३/३५	श्रौतस्मार्त्ता	३/५६
वानप्रस्थो	३/४९	षण्मासान्	३/२६
वा नाडी	३/१९	षण्मासान्	३/३०
विंशत्या	३/२९	षष्ठोद्ध्वे	३/३१
विप्रादा	३/१८	षष्ठो मासो	३/३६
विप्रा नैवा	३/४२	सद्यःशौचं	३/४८
विप्रैः सत्	३/१८	सद्यःशौचाः	३/३३
वैद्यः सत्री	३/४७	सद्यःशौचं	३/३१
शारीरं	३/१०	सद्यःशौचे	३/३३
शुद्धिः स्यान्न	३/४३	सद्यः शौचे	३/४६
शेषाहैः	३/१	सन्ध्यादि	३/६
शौचं दाहा	३/४५	सन्ध्यास्मार्त्ता	३/७

श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या	श्लोकांशाः	काण्डसंख्या/श्लोकसंख्या
सन्यासी	३/४५	स्नात्वोपोष्य	३/३८
सर्वे वर्णा	३/२९	स्नानात्तत्	३/२०
सर्वेषां	३/३२	स्मार्त्ताग्नौ	३/२०
सर्वेषां	३/३४	स्यातां न	३/३
साग्निरेवा	३/४४	स्रष्टा स्यात्	३/२
साग्निस्त्वे	३/२३	स्रावः स्यात्	३/३१
साग्नेरायु	३/५४	स्वग्रामीणे	३/५२
सापिण्डये	३/२	स्वाध्याया	३/२५
सावित्र्या	३/९	ह्यद्युक्तं	३/७
सूतौ सूतिः	३/३७	हेमामैः	३/५७
सूर्य्यं वन्दे	३/९	हेम्ना वा	३/५६
स्नाताब्दे	३/२८	हेम्ना वा	३/५७
स्त्र्याग्न्याद्यै	३/४८	हैः शुद्धिः	३/३७

❖❖❖

शुद्धिसारग्रन्थोद्धृतानां ग्रन्थ-ग्रन्थकाराणां सूची

वैदिकग्रन्था:

आथर्वणश्रुति:

काठकगृह्यम्

गृह्यपरिशिष्टम्

गोपथब्राह्मणम्

छन्दोगपरिशिष्टम्

तैत्तिरीयश्रुति:

धर्मशास्त्रकारा:

अगस्ति:

अङ्गिरा:

अत्रि:

आपस्तम्ब:

उशना:

कात्यायन:

काश्यप:

कार्ष्णाजिनि:

कौथुम:

गार्ग्य:

गोभिल:

गौतम:

जमदग्नि:

जातुकर्ण:

जाबालि:

दक्ष:

देवल:

नारद:

पराशर:

पारस्कर:

पितामह:

पुलस्त्य:

पैठीनसि:

प्रचेता:

प्रजापति:

बृहत्प्रचेता:

बृहन्मनु:

बृहस्पति:

बौधायन:

भृगु:

मनु:

मरीचि:

मार्कण्डेय:

यम:

याज्ञवल्क्यः
योगीयाज्ञवल्क्यः
लघुहारीतः
वसिष्ठः
विश्वामित्रः
विष्णुः
वृद्धगर्गः
वृद्धमनुः
वृद्धवसिष्ठः
वृद्धशातातपः
वैशम्पायनः
व्याघ्रः
व्याघ्रपादः
व्यासः
शंखः
शंखलिखितौ
शातातपः
शौनकः
संवर्त्तः
सत्यतपः
सत्यव्रतः
सत्याचार्यः
सुमन्तुः
सौम्यः
स्मृतिः
स्मृतिसंग्रहः
स्मृत्यन्तरम्
हारीतः

पुराणग्रन्थाः

आग्नेयपुराणम्
आदित्यपुराणम्
आदिपुराणम्
एकाम्रपुराणम्
कूर्मपुराणम्
गरुडपुराणम्
जैमिनीयरामायणम्
देवीपुराणम्
नरसिंहपुराणम्
पुराणान्तरम्
बृहद्विष्णुपुराणम्
ब्रह्मपुराणम्
ब्रह्मवैवर्त्तपुराणम्
ब्रह्माण्डपुराणम्
भविष्यपुराणम्

मत्स्यपुराणम्
महाभारतम्
मार्कण्डेयपुराणम्
लिङ्गपुराणम्
रामायणम्
वराहपुराणम्
वह्निपुराणम्
वायुपुराणम्
विष्णुधर्मोत्तरम्
विष्णुपुराणम्
शिवपुराणम्
श्रीमद्भगवद्गीता
स्कन्दपुराणम्

धर्मनिबन्धकाराः/
धर्मनिबन्धग्रन्थाः

अनन्तभट्टः
आचारपल्लवः
कामधेनुकारः
कालमाधवः
कालादर्शः
कालिदासचयनी
कृत्यकल्पतरुः
कृत्यकौमुदी
कृष्णबृहत्पण्डितः
तिथितत्त्वम्
नारायणभाष्यम्
निबन्धकारः
नीतिरत्नाकरः
पञ्चाननः
पितृचरणाः
मदनपारिजातः
माधवाचार्यः
मेधातिथिः
राघवभट्टः
रुद्रधरः
लक्ष्मीधरः
विज्ञानेश्वरः
विप्रमिश्रः
विश्वरूपः
शतानन्दः
शुद्धिगुच्छः
शुद्धिचिन्तामणिः
श्रीधरस्वामी
षट्त्रिंशन्मतम्

हारलता

तन्त्रग्रन्थाः

उत्तरशीरः

तत्वयामलः

तत्त्वसारसंहिता

प्रपञ्चसारः

रुद्रयामलः

विष्णुयामलः

वैश्वानरसंहिता

हयशीर्षपञ्चरात्रम्

प्रकीर्णकग्रन्थाः

चरकः

जैमिनिसूत्रम्

जैमिनीयन्यायः

ज्योतिःशास्त्रम्

भट्टः

राजमार्तण्डः

वात्स्यः

वार्त्तिककारः

विश्वकोषः

श्रीनिवासः

❖❖❖